Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२५

श्रीः

माधुकक्षीरसहायपण्डितविरचिता

हरमेखला

सटीका

(मध्यमखण्डः)

'भट्टराई' इत्युपाह्व पं. कृष्णप्रसादशर्मणा

संपादिता

श्री पं. बुद्धिसागरशर्मणः प्रधानानुसन्धानाधिकारित्वे

नेपालराष्ट्रियाभिलेखालयतः

प्रकाशिता

काष्ठमण्डपः

२०३०

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री

पुरातत्त्वप्रकाशनमालायाः ६६ तमं पुष्पम्

माधुकृधीरसहायपण्डितविरचिता

हरमेखला

सटीका

पञ्चमपरिच्छेदात्मको
मध्यमखण्डः

'भट्टराई' इत्युपाह्व पं. कृष्णप्रसादशर्मणा

संपादिता

श्री पं. बुद्धिसागरशर्मणः प्रधानानुसन्धानाधिकारित्वे

नेपालराष्ट्रियाभिलेखालयतः

प्रकाशिता

काठमण्डपः

२०३०

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रथमवार–५००

विक्रम सम्वत् २०३० रामनवमी

मुद्रकः– "संकटा प्रेस" ६।५३४ टेवहाल, काठमाडौं, नेपाल।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री

हरमेखलायाः

पंचमपरिच्छेदस्थविषयाणाम्

अनुक्रमणिका

विषयाः	पृष्ठाङ्काः
पंचमपरिच्छेदोपक्रमः	१
गन्धविषयप्रतिपादनप्रतिज्ञा	१
विविधी जलवासयोगाः	१-२
दन्तधावन(दन्तकाष्ठ)विधिः	३-४
मुखरोगापहारी सुगन्धिकवलग्रहः	४
अञ्जनविधिः	५
विविधा मुखवासयोगाः	५-१०
विविधानि गन्धतैलानि	११-१७
नानाविधान्युद्वर्तनकानि	१७-१८
स्नानकम्	१८
मलनकम्	१६
स्नानामलक(स्नानोपयोगिगन्धामलक)विधिः	१६-२०
सर्वौषधिस्नानम्	२१
ग्रहविघटनस्नानम्	२१
उन्मलनकषाययोगः	२१
अष्टमंगलाभिधं स्नानीयगन्धयोगद्वयम्	२२
उन्मलनकान्तरम्	२२
उद्वर्तनकान्तरम्	२२
सुगन्धिस्नानान्तराणि	२३-२५
पटवासयोगाः	२६
क्रमधूपाभिधानम्	२६
नानाविधा गन्धधूपयोगाः	२६-३२
धूपवर्तिविधिः	३२-३४
गन्धदीप(दीपवर्ति)विधिः	३४-३६
गन्धयोगद्वयम्	३६
विविधानि विलेपनानि	३७
विविधगन्धानां (गन्धोदकानां) साधनविधिः	३८-४६
पुष्पादेर्गन्धापहारविधिः	४७
तत्र पुष्पान्तरीयगन्धसंक्रामणम्	४७
हरिद्राशोधनविधिः	४८
रोचनिकाशोधनविधिः	४८

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुसुम्भचूर्णादेः कुंकुमरूपत्वापादनम्	४८-४९
कुंकुमसुरभिगन्धसंपादनयोगाः	४९-५०
ग्रीष्मोपयोगिगन्धविशेषसाधनम्	५०
गन्धान्तरम्	५१
विलेपनोपयोगियोगान्तराणि	५१-५२
चन्दन(पंकादि)कृतिः	५३
विलेपनान्तरम्	५३
मलयगन्धिविलेपनान्तरम्	५३
मलयप्रतिरूपगन्धकृतिः	५३
चन्दनगन्धिविलेपनकृतौ उपायान्तरम्	५४
शीतकालोपयोग्यगुरुगन्धि गन्धद्वयम्	५४
शिग्रुमूलानां गन्धदलत्वापादनयुक्तिः	५५
कपित्थनिर्वर्त्यगन्धोचितयोगापादनम्	५५
विलेपनोपयोगियोगान्तराणि	५५-५६
कस्तूरिकाकृतिः	५६-५७
गन्धोपयोग्यासवपरिकर्म	५७-६१
प्रसंगात् मृगमदगन्धियोगद्वयकथनम्	५८
सुगन्ध्यासवकरणम्	५९
आसवोपयोगि गन्धचूर्णम्	५९
सद्य आसवनिर्मायकयोगाः	६०
आसवभाण्डाद्युपयोगिधूपवासादियोगाः	६०
कर्पूरकृतिः	६१-६२
कुंकुमकृतिः	६३-६७
अगुरुकृतिः	६७-६८
सिह्लककृतिः	६९-७१
सहकार(तैलरसादि)कृतिः	७२-७४
कर्पूरपानीय(कर्पूरतैल)कृतिः	७४-७५
लवङ्गकृतिः	७५
एलाकृतिः	७६
कुष्ठकृतिः	७६
सहकार(तैलरसादि)स्थैर्यापादनयुक्तयः	७६
पुष्पद्रावणयुक्तयः	७६-७८
परिच्छेदोपसंहारः	७८

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ पंचमः परिच्छेदः

विउलाइँ महामइविरइआइँ दट्ठूण गन्धसत्थाइँ ॥
अह पंचमो णिबद्धो विअड्ढदइओ परिच्छेओ ॥१॥

विपुलानि महामतिविरचितानि दृष्ट्वा गन्धशास्त्राणि ।
अथ पंचमो निबद्धो विदग्धदयितः परिच्छेदः ॥

स्पष्टार्था गाथा। विपुलग्रहणेन स्वकृतेः संक्षिप्तत्वं प्रतिपादितं, महाबुद्धिविरचितत्वेन सार(वत्)त्वमिति ॥१॥

दिअहे दिअहे जे जह कमेण वजन्ति णिच्चमुवजोअं ॥
छेआण ते तहच्चिअ भणिमो गन्धं समासेण ॥२॥

दिवसे दिवसे ये यथा क्रमेण व्रजन्ति नित्यमुपयोगम् ।
छेकानां तांस्तथैव भणामो गन्धान् समासेन ॥

ये विदग्धानां सत्वाः (गन्धाः) सुरभिद्रव्याणि । यथा येन प्रातर्मध्याह्नापराह्नादिकालविभागान्नानाप्रकारेणोपयुज्यन्ते तान् क्रमानतिक्रमेण तथैव समनन्तरोक्तक्रमेण। प्रतिदिनग्रहणम् ऋत्वादिकालविभागादीनामुपलक्षणार्थमिति ॥१॥

कच्चूरकललवक्कलपिअंगुचुण्णेण कुणह जलवासं ॥
तुलिअघणसारगन्धं मेलिअमत्तालिणिकुरुम्बं ॥३॥

कर्चूरकललवल्कलप्रियंगुचूर्णेन कुरुत जलवासम् ।
तुलितघनसारगन्धं मेलितमत्तालिनिकुरुम्बम् ॥

कच्चूरं कयलमिति प्रसिद्धं, तथा कललं मांसी, वल्कलं त्वक्, प्रियङ्गुः श्यामा। एषां समांशानां चूर्णेन मिश्रितेन तोयाधिवासनं सम्पादयत। तावता च चूर्णितेन द्रव्येणाधिवासः कार्यो यावता तोयस्य स्वरसविकृतिर्न जायते सौरभं चोत्पद्यते। शिष्टं गुणप्रतिपादनार्थं स्पष्टं विशेषणद्वयम् । मेलिताः संघटिता इति ॥३॥

सामातअकइकच्चूरसरिसभाएहि विरइओ वासो ॥
होइ विणिज्जिअकप्पूरपरिमलो [1]कामिणं दइओ ॥४॥

श्यामात्वचकपिकर्चूरसदृशभागैर्विरचितो वासः ।
भवति विनिर्जितकर्पूरपरिमलः [2]कामिनां दयितः ॥

पूर्वोक्तैरेव त्रिभिर्द्रव्यैर्मांसीपरिवर्तात् कपिना सिल्हकाख्येन सहितैः समांशैश्चूर्णितैर्जलस्याधिवासनं सम्पादितमुक्तविशेषणविशिष्टगुणातिशयं शृङ्गारिजनवल्लभं भवतीति ॥४॥

१ कामिणीदइओ – ख. । २ कामिनीदयितः– ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलिणीदलकेसरेलुप्पलासारचेअइदलेहि ॥
जलवासो होइ विकसिअपाडलामोअपडिरूवो ॥५॥

फलिनीदलकेसरैलोत्पलासारचेतकीदलैः ।
जलवासो भवति विकसितपाटलामोदप्रतिरूपः ॥

फलिनी प्रियङ्गुः, दलं गन्धपत्रं, केसरं नागकेशरम्, एला त्रुटिः, उत्पलं कुष्ठम्, असारं त्वक्, चेतकीदलानि निरण्डाहरीतकीपत्राणीत्येतैः समांशैश्चूर्णितैरुदकाधिवास उक्तविशेषणविशिष्टगुणो भवति । पाटला पुष्पविशेष इति ॥५॥

ससिविद्धासारविसल्लिकंगुकपल्लेहि कुणह जलवासं ॥
दलकुट्ठकेसरेलाचेअइचुण्णेन व सुअन्धं ॥६॥

शशिविद्धासारपिसल्लिकङ्गुकपलैः कुरुत जलवासम् ।
दलकुष्ठकेसरैलाचेतकीचूर्णेन वा सुगन्धम् ॥

शशिना कर्पूरेणाविद्धैरल्पमात्रया दत्तसंस्कारैस्त्वङ्मांसीप्रियंगुकर्चूरैः [1]समांशचूर्णितैरुदकाधिवासं सुगन्धि साधयत । अथवा [2]समनन्तरपूर्वगाथोक्तैस्त्वक्प्रियङ्गुरहितैर्जलवासं कुरुतेति द्वितीयः प्रयोग इति ॥६॥

खज्जूरकुसुमवित्थअबाहिरछल्लीइ वासितं सलिलं ॥
तुडितअरपत्तकुवलअमलएहि व सुन्दरामोअं ॥७॥

खर्जूरकुसुमविस्तृतबाह्यत्वचा वासितं सलिलम् ।
त्रुटितगरपत्रकुवलयमलयैर्वा सुन्दरामोदम् ॥

खर्जूरस्य पिण्डखर्जूरस्य प्रान्ते यानि पुष्पाण्युत्पद्यन्ते तेषां कोशरूपमाच्छादनकं घनदलप्रायं यद् भवति तद् विस्तृतशब्देन प्राकृतभाषायां प्रसिद्धम् । तस्य बहिर्भागगतं यद् वल्कलं तेन चूर्णितेनाधिवासितं जलं सुभगसौरभं भवतीति शेषः । अथवा एलाश्यामातगरगन्धपत्रकुष्ठचन्दनैरधिवासितमेवं भवतीति ॥७॥

एलाणरेन्दचन्दणदलकुवलअवासिए जले पीए ॥
णीसरइ रोमकूवेहि सामलो ? परिमलुग्गारो ॥८॥

एलानरेन्द्रचन्दनदलकुवलयवासिते जले पीते ।
निःसरति रोमकूपेभ्यो वीरणपरिमलोद्गारः ॥

[3]समनन्तरपूर्वगाथापरार्धोक्तस्य प्रयोगस्य फलान्तरप्रतिपादनार्थं पुनरस्यां गाथायां तथैव द्रव्याण्युदीरितानि । फलान्तरं च – तदधिवासिते जले पीते सति समस्तकायवेधकत्वाद् रोमकूपेभ्यो वीरणविद्धसौरभोद्गम इति ॥८॥

— उदकवासविधिः ।

---

१ कर्पूरैः– ख. । २ समनन्तरपूर्वगाथोक्तै तु प्रियंगुरहितैः– ख. । ३ समनन्तरगाथोक्तस्य– ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सकसाअतरुसमुब्भवमण्णं वा मउअकुच्चअमणिण्णं ॥
दन्तधवणमसारमुरापिअंगुरसवारिकअलेवं ॥ ॥
कअधूवमालईकुसुमवाससससिवेहवड्ढिआमोअं ॥
होइ णराहिवजोग्गं विहडिअमुहरोअमाहप्पं ॥९-१०॥

सकषायतरुसमुद्भवमन्यद् वा मृदुककूर्चकमनिन्द्यम् ।
दन्तधावनमसारमुराप्रियङ्गुरसवारिकृतलेपम् ॥
कृतधूपमालतीकुसुमवासशशिवेधवर्धितामोदम् ।
भवति नराधिपयोग्यं विघटितमुखरोगमाहात्म्यम् ॥

दन्तधावनमीदृशं राजोचितं तथा समस्तास्यव्याधिप्रभावविनिवर्तकं भवति । कीदृशम्-कषायरसप्रधानवृक्षजमन्यद् वा कटुतिक्तसुगन्धिवृक्षजं [1]निर्दलिताग्रत्वान्मसृणकूर्चप्रायमुखं तथाऽनिन्द्यं निषिद्धवर्जं तथा त्वक्सुगन्धमुराश्यामाबोलबालकैर्जलेनसूक्ष्मपिष्टैर्लिप्ताग्रं तथा कृतधूपैर्वक्ष्यमाणधूपाधिवासितैः सुमनःपुष्पैर्योधिवासस्तथा कर्पूरेण यो वेधः स्वल्पमात्रया संस्कारस्ताभ्यां विशेषितसौरभम् । लेपादीनां वेधान्तानां यथाक्रमं विनियोग इति युगलकम् ॥

गोसलिलवसिअगहिअं धूविअमच्चन्तमुग्गधूएहि ॥
तअमरिअकेसरेलागुण्ठिअमइसुरहि दन्तपवणं ॥११॥

गोसलिलोषितगृहीतं धूपितमत्यन्तमुग्रधूपैः ।
त्वङ्मरिचकेसरैलागुण्ठितमतिसुरभि दन्तधावनम् ॥

उक्तजातिकं क्षुण्णाग्रं च दन्तधावनमेवंविधं सदतिसुगन्धि भवति । कीदृशं-गोमूत्रपर्युषितं सत् ततो गृहीतम् । ततो वक्ष्यमाणैरुत्कटामोदैर्गुग्गुलादिभिर्धूपैरतिशयेनाधिवासितम् । ततोऽसारोषणनागकेसरत्रुटिभिरतिसूक्ष्मचूर्णितै[2]रवघर्णिताग्रमिति ।

ग्रन्थान्तरपठिताद् दन्तधावनविधेरिहानुक्तं यत् तदुपादेयमिति सविधिर्लिख्यते—

[3]वटासनार्कखदिरकरञ्जकरवीरकम्[4] ।
सर्जारिमेदापामार्गमालतीककुभोद्भवम् ॥
कषायतिक्तकटुकमूलमन्यदपीदृशम् ।
विज्ञातवृक्षं क्षुण्णाग्रमवृद्धग्रन्थि सुभूमिजम् ॥
कनिष्ठाग्रसमस्थौल्यं सुकूर्चं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा च यतवाग् भक्षयेद् दन्तधावनम् ॥
वार्ष्पात्रवर्णत्रितयक्षौद्रान्तेन च घर्षयेत् ।
शनैस्तेन ततो दन्ता दन्तमांसान्यदूषणाम् ॥
लिखेदनुसुखं जिह्वां जिह्वानिर्लेखनेन च ।
तथास्यमलवैरस्यगन्धा जिह्वास्यदन्तजा ॥

१ निर्मलिताग्र- ख. । २ रवचूर्णिताग्रमिति- ख. । ३ वटार्कखदिर- ख. । ४ करवीरजम्- ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुचिवैशद्यलघुता नभवन्ति भवन्ति च ।
नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः ॥
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत् ।
नैव श्लेष्मान्तकारिष्टविभीतकनिबन्धनम् ॥
विल्वबब्बूलनिर्गुण्डीशिग्रु तिल्वकतिन्दुकान् ।
कोविदारशमीपीलुपिप्पलीकुन्दगुग्गुलून् ॥
पारिभद्रकमल्लीकामोचब्यो(क्यौ)शाल्मलीशणान् ।
स्वादुवम्ललवणं शुष्कं सुषिरं पूति पिच्छिलम् ॥
पालाशमासनं दन्तधावनं पादुके त्यजेत् ।
दन्तानूर्ध्वमधो घर्षेत् प्रातः सिंचेच् च लोचने ॥ इति

— दन्तकाष्ठविधिः ।

धणिअत्रतिअडुअतिसुअन्धकुट्ठघणचुराणकुसुमसारेहि ॥
कवलग्गहो सुअन्धं कुणइ मुहं रोअरहिअं च ॥१२॥

धान्य(ा)कत्रिकटुकत्रिसुगन्धकुष्ठघनचूर्णकुसुमसारैः ।
कवलग्रहः सुगन्धि करोति मुखं रोगरहितं च ॥

कवलस्य द्रव्यान्तररहितस्यास्यचालनार्थस्य द्रवद्रव्यस्यास्येन स्वीकार आस्यं सुसौरभं नीरोगं च करोति । कीदृशः— कुस्तुम्बरीफलानां तथा त्रिकटुकस्य शुण्ठीमरिचपिप्पलीनां तथा त्रिसुगन्धस्य त्वगेलागन्धपत्राणां तथा वाप्यस्य तथा मुस्तस्यैषां समांशानां चूर्णेन माक्षिकेण कवलयोगेन वा कृतः ।

कवलस्य लक्षणम्—

'असञ्चार्यो मुखे चूर्णो गण्डूषः कवलोन्यथा ।'
तेन सञ्चारणयोग्यमास्यगतं जलादि कवल उच्यत इति ॥

— कवलग्रहः ।

जुत्तीइ सुगन्धितेल्लमीसिअं मन्दाणलेण विलीणअं ॥
गलिअमइप्पउरसलिलपिट्ठमपिण्डिअदेहअं ॥ ॥
दद्दुरए धूविअं च सुरहिपसूअसुगन्धिअं ॥
सित्थअमिणमो लवंगअतिहलामदससिविद्धअं ॥१३–१४॥

युक्त्या सुगन्धितैलमिश्रितं मन्दानलेन विलीनकम् ।
गलितमतिप्रचुरसलिलपिष्टमपिण्डितदेहकम् ॥
दर्दुरके धूपितं च सुरभिप्रसूनसुगन्धिकम् ।
सिक्थकमिदं लवंगकत्रिफलामदशशिविद्धकम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं सिक्थकमधरप्रसाधनोपयोगि मधूच्छिष्टम्। कीदृशम् –वक्ष्यमाणेन केनचित् सुगन्धिना तैलेन मिश्रितं कृत्वा युक्त्या यथा न दह्यते तथा मृद्वग्निना विलीनं कृतम्। ततो गालितं सत् प्रभूतेन जलेन वर्तितम्। ततोऽघनात्मकसनाश्यानमेव दर्दरके वक्ष्यमाणे सपिधाने वस्त्रावच्छन्नमुखेऽन्तःक्वथद्वक्ष्यमाणसुगन्धधूपद्रव्ये भाण्डे तदुद्गतबाष्पे तत्पिधानवस्त्रस्थं संधूपितमधिवासितं सत् सुगन्धिभिः सुमनःप्रभृतिभिः पुष्पैरप्यधिवासितम्। ततो लवङ्गेन देवकुसुमेन तथा त्रिफलया जातीफलकक्कोलककटुफलात्मिकया (सु)गन्धत्रिफलया तथा मदेन कस्तूरिकया तथा शशिना कर्पूरेणैतैः समांशैर्विद्धं कृतसंस्कारम्। एवंप्रायेण सिक्थकेन पूर्वं लेपेनाधरं मसृणीकृत्य पश्चाद् अलक्तकादिना रागेण रञ्जयेदित्यस्य विधिरिति ॥युगलकम्॥

मलअमिअंकेलादलविसाणमहुकेसरेहि समतुलिअं ॥
कअचुण्णं सोवीरअमञ्जणमइसुरहि सुपसत्थं ॥१५॥

मलयमृगाङ्कैलादलविषाणमधुकेशरैः समतुलितम् ।
कृतचूर्णं सौवीरकमञ्जनमतिसुरभि सुप्रशस्तम् ॥

सौवीरकं शैलाञ्जनं मसृणपिष्टमतिसुगन्धि मङ्गल्यं चाञ्जनं नेत्रप्रसाधनं भवति। कीदृशं सत् — चन्दनकर्पूरत्रुटिसुगन्धिपत्रकुष्ठमधुयष्टीनागकेसरैः परस्परं समांशैः सूक्ष्मपिष्टैः समतुलितम्। यावन्त्येतानि समस्तानि द्रव्याणि तावत्परिमाणं तदिति ॥१५॥

—अञ्जनविधिः

कक्कोलअपूअफलखइरकसाएहि पलप्पमाणेहि ॥
जाईफलकरिसुम्मीसिएहि सहआरमलिएहि ॥ ॥
दप्पमिअंकारुणलवलीकोसचलमलअताम्मभाएहि ॥
दोमासिएहि सुरणाहवल्लहं कुणह मुहवासं ॥१६–१७॥

कक्कोलकपूगफलखदिरकषायैः पलप्रमाणैः ।
जातीफलकर्षोन्मिश्रितैः सहकारमलितैः ॥
दर्पमृगांकारुणलवलीकोशचलमलयताम्रभागैः ।
द्विमाषिकैः सुरनाथवल्लभं कुरुत मुखवासम् ॥

एतैर्द्रव्यैः पुरन्दरप्रियमास्याधिवासनं गुटिकारूपं साधयत। कैः- कक्कोलकेन कोलकेन, तथा पूगफलेन गोपफलेन, तथा खदिरं क्वाथयित्वा गृहीतेन घनेन तत्सारेणैतैः प्रत्येकं प्रकुञ्चपरिमाणैः। कीदृशैः— जातीफलस्य मालतीफलाण्डस्य विडालपदकेन सहितैः। तथा सहकारेणाम्ररसेन गुलिकाकरणक्षमेण भावितैः। तथा दर्पस्य मृगमदस्य तथा मृगाङ्कस्य कर्पूरस्य तथाऽरुणस्य कुङ्कुमस्य तथा लवल्या लताकस्तूरिकायास्तथा कोशस्य जातिपत्रिकायास्तथा चलस्य सिल्लकस्य तथा मलयस्य चन्दनस्य तथा ताम्रस्य त्वचस्य भागैः समैरशैः। किंप्रमाणैः— माषद्वयपरिमाणैः। माषकः पान(शाण)चतुर्भाग इति युगलकम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कमवड्ढिएहिं तअतुडिपिसल्लिकच्चूरलोहघुसिणेहि ॥
घणमलअमालईफललवंगकक्कोलचन्देहि ॥ ॥
अद्धंसिएहि खीरिणिकुन्तिसितामीसिएहि समदेहि ॥
समपिण्डिअपूगफलसहआररसेहि मुहवासो ॥१८–१९॥

क्रमवर्धितैस्त्वचत्रुटिपिसल्लीकर्चूरलोहघुसृणैः ।
घनमलयमालतीफललवंगकक्कोलचन्द्रैः ॥
अर्धांशिकैः क्षीरिणीकुन्तीसितामिश्रितैः समदैः ।
समपिण्डितपूगफलसहकाररसैर्मुखवासः ॥

एतैर्द्रव्यैर्मुखवास आस्याधिवासनं गुलिकारूपं भवतीति शेषः । कैः— असारैलामांसी-कयलागुरुकाश्मीरकैः । एतैस्त्वचस्य भाग एलादीनां प्रत्येकमेकैकभागवृद्ध्या क्रमेण वर्धितैः, तथा मुस्तचन्दनजातीफलदेवकुसुमकोलककर्पूरैरेतैरर्धांशिकैर्मूलद्रव्यात् त्वचादर्धभागपरिमाणैः सर्वैः समांशैः । तथा कीदृशैरेतैर्घनादिभिः— तुकाक्षीरीबृहदेलासितशर्कराकस्तूरिकादिभिरर्धांशिकाभिरेव सहितैः । तथा तुल्यसंख्यातौ गोपफलाम्ररसौ येषां तैस्तथाविधैः । यावत्परिमाणानि त्वचादीनि सर्वाणि द्रव्याणि तावत्परिमाणं पूगफलचूर्णं सहकाररसार्द्रीकृतमत्र देयमित्यर्थः ॥ युगलकम्॥१८–१९॥

सोलह कक्कोलआण भाआ णव मिअलाञ्छणभाअका ॥
जाईफलमिअमआणमेक्के कांससणाहआ ॥ ॥
तिउणारुणकोसभाअविउणलवंगुम्मीसिआ ॥
पक्का फलपूरअम्मि सुहसहआररसोल्लिअआ ॥ ॥
विहिविरइअसुकुसुमवासविविहपसरन्तमांसलामोओ ॥
मुहवासो सुरवहुवअणकमलमअरन्दसन्दोहो ॥२०–२२

षोडश कक्कोलकानां भागा नव मृगलाञ्छनभागकाः ।
जातीफलमृगमदयोरेकैकांशसनाथकाः ॥
त्रिगुणारुणकोशभागद्विगुणलवङ्गोन्मिश्रिताः ।
पक्वाः फलपूरके शुभसहकाररसार्द्राः ॥
विधिविरचितसुकुसुमवासविविधप्रसरन्मांसलामोदः ।
मुखवासः सुरवधूवदनकमलमकरन्दसन्दोहः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवंविधा भागा मुखवासो भवतीति सम्बन्धः । कीदृशा भागाः— कक्कोलकानां कोलकानां सम्बन्धिनः षोडश भागास्तथा मृगलाञ्छनस्य कर्पूरस्य नव भागाः । ते कीदृशाः– मालतीफलकस्तूरिकयोः प्रत्येकमेकैकेनांशेन भागेन युक्तास्तथा त्रिगुणेन कुङ्कुमेन तथा कोशस्य जातिपत्रिकाया भागेनैकेनांशेन तथा द्विगुणेन भागद्वयपरिमाणेन लवङ्गेन देवकुसुमेन सहिताः । एवंपरिमाणाः सन्तः शुभेन सहकाररसेनाम्ररसेनार्द्राः सन्तः पश्चात् फलपूरस्य मातुलुङ्गस्य निष्कुषितबीजादेः परिवर्तितत्वचो गर्भे निक्षिप्य तत् कुशतन्तुभिर्बद्ध्वा पद्मिनीकर्दमेनाङ्गुलद्वयमात्रघनेनावगुण्ठ्य गोमयकारीषकाग्नौ निक्षिप्य तदभ्यन्तरे पक्वास्ततस्तस्मिन् कर्दमे पाकवशाल्लोहितीभूते तस्मात् कारीषकात् तन्मातुलुङ्गमाकृष्य कर्दमावगुण्ठनमपास्य तस्मान्मातुलुङ्गाभ्यन्तरात् ते द्रव्यभागाः पृथक्करणीयाः । ततो गुलिकात्वमापादितास्ते मुखवासो भवति । कीदृशः– विधिना भूयो भाण्डादि(धि)वासनरूपेण विधानेन सम्पादितो यः शोभनानामुत्कृष्टामोदानां पुष्पाणां सम्बन्धी वासः सरस्तेन विविधो विचित्रो विसर्पन् घनः सौरभविशेषो यस्य स तथा(–विधः) । अत एव देवनारीयोग्यत्वात् तन्मुखांबुजानां परिमलप्रसरोऽसाविति ॥तिलकम्(कुलकम्)॥

एक्केक्को गिरिकुंकुमसरलसिआकमलकेसरमुराण ॥
दोदो भुअंगवल्लहकुन्दुरुजलवाहवोलाण ॥ ॥
अट्ठट्ठवीससोलह भाआ दससैलउदुसमा कमसो ॥
मअकोलअपूअफलसलिललवलीलवंगकोशाण ॥ ॥
पंचउणमालईफलकच्चूरचउग्गुणंससंवलिआ ॥
सहआरतेल्लमलिआ मुहवासे पारिजाअम्मि ॥२३–२५॥

एकैको गिरिकुङ्कुमसरलसिताकमलकेसरमुराणाम् ।
द्वौ द्वौ भुजङ्गवल्लभकुन्दुरुजलवाहवोलानाम् ॥
अष्टाष्टविंशतिषोडश भागा दशशैलर्तुसमाः क्रमशः ।
मदकोलकपूगफलसलिललवलीलवंगकोशानाम् ॥
पञ्चगुणमालतीफलकर्चूरचतुर्गुणांशसम्बलिताः ॥
सहकारतैलमलिता मुखवासे पारिजाते ॥

अस्मिन् पारिजाताख्ये मुखवासे सन्धीयमाने तत्सन्धानद्रव्याणामेवं भागा भवन्तीति सम्बन्धः । कथम् — गिरेः शैलेयस्य तथा काश्मीरकस्य तथा सरलस्य चीडाकाष्ठस्य तथा सितशर्करायास्तथा पद्मकिञ्जल्कस्य तथा सुगन्धमुरायाः, एषां प्रत्येकमेकैको भागः, तथा भुजङ्गवल्लभस्य चन्दनस्य तथा कुन्दुरोः सल्लकीनिर्यासस्य तथा जलवाहस्य मुस्तकस्य तथा बोलस्य जाती(फल)रसस्यैतेषां प्रत्येकं द्वौ द्वौ भागौ, तथा मदादीनां सप्तानां द्रव्याणामष्टादयः सप्त भागभेदा इति क्रमशः समष्टेरत्रायं क्रमः— मदस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कस्तूरिकाया अष्टौ भागास्तथा कोलकस्याष्टावेव, तथा [1]पूगफलानां विंशतिस्तथा बालकस्य षोडश तथा लवल्या लताकस्तूरिकाया दश । तथा लवङ्गस्य देवकुसुमस्य शैलसङ्ख्या सप्त, तथा कोशस्य जातिपत्त्रिकाया ऋतुसंख्या षड् भागाः । एते कीदृशाः— पञ्चगुणेन भागपञ्चकपरिमाणेन जातीफलेन तथा कर्चूरस्य कप(य)लस्य चतुर्गुणै-र्भागचतुष्टयपरिमाणैरंशैः संयुक्ताः । एवंविधा एते भागाः संचूर्णिताः सन्तः सहकारतैलेनाम्ररसेन पश्चाद् भाविता गुलिकायोग्यत्वमापादिता इति तिलकम् ॥२३-२५॥

मअतुहिणेलावक्कलतिफलादलघुसिणलवलिकोसेहि ॥
समलअसहआररसेहि माउलुंगोअरे पक्कं ॥ ॥
केअइविरइअवासं पसरन्तुद्दाममासलामोअं ॥
ण लहन्ति पारिआअअमपसाइअपव्वईणाहा ॥२६-२७॥

मदतुहिनैलावल्कलत्रिफलादलघुसृणलवलीकोशैः ।
समलयसहकाररसैर्मातुलुङ्गोदरे पक्वम् ॥
केतकीविरचितवासं प्रसरदुद्दाममांसलामोदम् ।
न लभन्ते पारिजातकमप्रसादितपार्वतीनाथाः ॥

पारिजाताख्यमपरमिमं मुखवासमनाराधितगौरीवल्लभा नरा न प्राप्नुवन्ति । कीदृशम्- पूर्वोक्तयुक्त्या बीजपूराभ्यन्तरे पक्वम् । कैर्द्रव्यैः- मदेन कस्तूरिकया तथा तुहिनेन कर्पूरेण तथा त्रुट्या तथा त्वचा तथा पूर्वोक्तया गन्धत्रिफलया तथा गन्धपत्रेण तथा कुङ्कुमेन तथा लताकस्तूरिकया तथा जातिपत्रिकयेत्येतैः समांशैः । कीदृशैः- चन्दनाम्ररससहितैः । तत श्चन्दनेन पूर्वोक्तद्रव्यसमांशेनैव । आम्ररसेनैवम् । आम्ररसेन समस्तद्रव्यचूर्णभावना-योग्येनैवं भावितं पक्वं सत् मातुलुङ्गात् पूर्ववन्निष्क्रष्य केतकीपुष्पैः पूर्ववदेव दत्ताधिवासमत एव विकसत्सान्द्रसौरभमिति ॥युगलकम्॥ २६-२७॥

लवलिलवंगहिमाउरुकोसारुणरेणुमअपिसल्लीहि ॥
मच्छण्डिमालईफलवेणुब्भव[2]सरिसभाएहि ॥ ॥
जलणिहिसममिअलञ्छणविउणद्दिणककोला ॥
कक्कोलअतिउणकसाअमीलसहआरतेल्लोल्ला ॥ ॥
एदाओ मअरद्धअकण्णीसुअजवणकामिणिपिआओ ॥
सेवह खइरगुलिआउ देवद्दिअदिण्णसेसाउ ॥२८-३०॥

लवलीलवंगहिमागुरुकोशारुणरेणुमदपिसल्लीभिः ।
मत्स्यण्डिकामालतीफलवेणूद्भव[3]सदृशभागैः ॥

---

१ पूगफलजातीनां- ख. । २ बेणुब्भवेहि (?) । ३ वेणूद्भवैः (?) ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलनिधिसममृगलाञ्छनद्विगुणदत्तकक्कोलाः ।
कक्कोलकत्रिगुणकषायमिश्रसहकारतैलाद्राः ॥
एता मकरध्वजकर्णीसुतयवनकामिनीप्रियाः ।
सेवध्वं खदिरगुलिका देवद्विजदत्तशेषाः ॥

एताः खदिरगुलिकाः खदिरसारचूर्णप्रधाना मुखवासगुलिका भजध्वम् । कीदृशीः— उत्कृष्टामोदत्वाद् मदनमूलदेवयवनयुवतिदयितास्तथा सुरविप्रादिभ्यः प्रतिपादितशिष्टाः । कैर्द्रव्यैः साधिताः— लताकस्तूरिकादेवकुसुमचन्दनलघुजातिपत्रिकाकुङ्कुमकुन्तीकस्तूरिकागन्धमांसीभिः । तथा सितशर्कराजातीफलतुकाक्षीरीणां समैरंशैः । कीदृशीर्गुलिकाः— जलनिधिभिः समाद् भागचतुष्टयपरिमाणात् कर्पूरात् द्विगुणा(नि) कक्को(लफ)ला(नि) यासां ताः । तथा कक्कोलकात् त्रिगुणेन कषायेण पूर्वोक्तयुक्त्या गृहीतेन खदिरसारेण मिश्रितं यत् सहकारतैलं तेनाद्राः । सर्वद्रव्यचूर्णं चाम्ररसेनाद्रीकृत्य ताः कार्या इति तात्पर्यमिति तिलकम् ॥२८-२९-३०॥

समकअलेलावक्कलवंगदलघुसिणसंखचुण्णेहि ॥
विउणफलतिउणमिअदप्पकोसकक्कोलभाएहि ॥३१॥
सतउणपिअंगुम्मीसखइरमसिपञ्चासभाअरइआउ ॥
जाअन्ति खइरगुलिआ चारुसहआररसमलिआउ ॥३२॥

समकयलैलावल्कललवंगदलघुसृणशंखचूर्णैः ।
द्विगुणफलत्रिगुणमृगदर्पकोशकक्कोलभागैः ॥
सप्तगुणप्रियंगुमिश्रखदिरमसीपञ्चषभागरचिताः ।
जायन्ते खदिरगुलिकाश्चारुसहकाररसमलिताः ॥

(एतैर्द्रव्यैः) खदिरगुलिका जायन्ते । कैर्द्रव्यैः— कर्चूरत्वटित्वग्देवकुसुमगन्धपत्रकुङ्कुमनखानां चूर्णैः समांशैस्तथा द्विगुणैर्भागद्वयपरिमाणैर्जातीफलाण्डैस्तथा त्रिगुणैः प्रत्येकं भागत्रयपरिमाणैः कस्तूरिकाजातिपत्रिकाकक्को(लफ)लानामंशैः । कीदृश्यो गुलिकाः— सप्तगुणया भागसप्तकपरिमाणया श्यामया मिश्रस्य खदिरकषायचूर्णस्य पञ्चाशद्भागै (?)-निर्मिताः । ततः सर्वद्रव्यसहितखदिरचूर्णै रचिताः सत्यः [१]श्रेष्ठेनाम्ररसेनालोडिता इति॥ युगलकम् ॥३१-३२॥

गुरुमलअसिआहरेणुफलदप्पाउणकोसआ ॥
सह क्खीरिलवंगेहि काअव्वा समभाआ ॥ ॥
चत्तारि मिअंकस्स अ तेव्विअ कक्कोलस्संसा ॥
सोलह खइरुब्भवस्स तेल्लोल्ला मुहवासे ॥३३-३४॥

१ आम्रसारेण-ख.।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुमलयसिताहरेणुफलदर्पारुणकोशका: ।
सह चीरीलवंगाभ्यां कर्तव्या: समभागका: ॥
चत्वारो मृगांकस्य च त एव कक्कोलकस्यांशा: ।
षोडश खदिरोद्भवस्य तैलार्द्रा मुखवासे ॥

अस्मिन् मुखवासे द्रव्याणां भागा एवं देया इति संबन्ध: । कथम्— गुरुरगुरु:, मलयश्चन्दनम्, तथा सित(ा)शर्करा, तथा हरेणु: कुन्ती, तथा फल जातीफलम्, (तथा) दर्पो मृगमद:, तथा कुङ्कुमं तथा जातिपत्रिका । एतानि समांशानि कार्याणि । तुकात्त्वीरीदेवकुसुमाभ्यां सह । ते अपि समांशे एव कार्ये इत्यर्थ: । तथा चत्वारो भागा: कर्पूरस्य । त एव चत्वार एव कक्कोलकस्य[1] । तथा खदिरकषायचूर्णस्य षोडश भागा: । एते सर्वे चूर्णिता: सन्त: सहकारतैलेनार्द्रा: कार्या इति ॥ युगलकम् ॥३३-३४॥

—मुखवासविधि: ।

सहजलाइ पुराणमट्टिआइ पाऊण पच्चइ पुणो वि ॥
घणसामाकुडिलदलवक्कलमिसिहि मन्दाणलम्मि विहिणा ॥
तेल्लं सुगन्धमेदं धूविअमट्ठंसगन्धसंजुत्तं ॥
खरसूरकिरणतविअं होइ वरं पक्खमत्तेण ॥३५-३६॥

सहजलया पुराणमृत्तिकया पक्का पच्यते पुनरपि ।
घनश्यामाकुटिलदलवल्कलमिसिभिर्मन्दानले विधिना ॥
तैलं सुगन्धमेतद् धूपितमष्टांशगन्धसंयुक्तम् ।
खरसूर्यकिरणतापितं भवति वरं पक्षमात्रेण ॥

इहाग्निपाकसाध्यानि सूर्यपाकसाध्यानि च द्विविधानि सुगन्धतैलान्युपदिश्यन्ते । तत्र सूर्यपाकसाध्यं तैलमुपदिशन् सर्वसुगन्धतैलानां पाकविधिं व्यवस्थापयति ।

मृत्तिकया वल्मीकजया परमपुराणगृहाभित्तिजया वा षोडशगुण(जल ?)सहितया चतुर्गुणं तैलं पक्त्वा ततो मृत्तिकामपास्य तत् तैलं मुस्तश्यामातगरगन्धपत्रत्वक्छतपुष्पाभिर्गर्भन्यस्ताभि: षोडशगुणजलयुताभि: सह मृद्वग्नौ यथोक्तेन विधानेन पुनरपि क्वाथ्यते । द्वितीय एष पाको देय इत्यर्थ: । एतौ च द्वौ पाकौ यथोक्तैर्द्रव्यै: सर्वसुगन्धतैलानां पूर्वमवश्यं देयौ । ततो यदि वर्णेच्छा भवति (तदा) तद्वर्णार्थं वक्ष्यमाणविधिना तृतीय: पाको देय: । तत: सूर्यपाकसाध्यमभीष्टं चेत्तदैव तत् सुगन्धितैलं वक्ष्यमाणधूपानामन्यतमेन धूपितं स्वपरिमाणाद् अष्टभागमात्रेण गन्धद्रव्येण मिश्रितं सत् तीक्ष्णसूर्यांशुक्वथितं पञ्चदशाहेन श्रेष्ठमुपयोगितरं[2] सम्पद्यते । (तत:सूर्यपाकसाध्यं वा तैलं स्यात्) इति ॥युगलकम्॥३५-३६॥

---

१ कोलफलस्य-ख. । २ उपयोगित्वं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तद्वर्णपाकादनन्तरं यथावक्ष्यमाणाग्निपाकविधिः प्रयोक्तव्य इति व्यवस्थाप्येदानीं वर्ण-विधानार्थमाह—

कालेअअमहुअसुअण्णछल्लिपुंडरीअसाहिअं होइ ॥
तुलिअकलधोअसोहं तेल्लं लडहंगणादइअं ॥३७॥

कालेयकमधुसुवर्णच्छल्लीपुण्डरीकसाधितं भवति ।
तुलितकलधौतशोभं तैलं लटहाङ्गनादयितम् ॥

तैलं सुगन्धि साध्यं, वर्णयुक्त्याऽनया स्पर्धितकाञ्चनकान्ति सम्पद्यते । कीदृशं सत् कालेयकेन पीतसारेण तथा मधुकेन मधुयष्ट्या तथा सुवर्णच्छल्ली निष्पर्याया प्रसिद्धा, तया, तथा प्रपुण्डरीकेण चक्षुष्येणैतैर्द्रव्यैः पूर्वोक्तपाकद्वयानन्तरं गर्भन्यस्तैः षोडशगुण-जलसहितैः साधितं पक्वम् । तच्च सुभगवनितावल्लभमिति ॥३७॥

द्वितीयं वर्णविधिमाह—

पत्तंगरत्तचन्दणमंजिट्ठाहिंगुलोअलक्खाहि ॥
पक्कं तेल्लं कंकेलिकुसुमछाअं समुव्वहइ ॥३८॥

पत्राङ्गरक्तचन्दनमञ्जिष्ठाहिङ्गुलुकलाक्षाभिः ।
पक्वं तैलं कङ्केलिकुसुमच्छायां समुद्वहति ॥

एतैर्द्रव्यैः पूर्ववत् पक्वं सत् तैलमशोकपुष्पा(णामा)भां बिभर्ति । अतिलोहितं भवतीत्यर्थः । कैः— पत्राङ्गेन पटुरागेण तथा रक्तचन्दनेन कुचन्दनेन तथा मञ्जिष्ठया रक्तवल्ल्या तथा हिङ्गुलुकेन दरदेन तथा लाक्षया द्रुमव्याधिनैतैः समांशैर्गर्भन्यस्तैरिति ॥३८॥

अथ वर्णविधेरनन्तरं सर्वतैलानां गन्धद्रव्यभावनं नियमयितुमाह-

इअ पीअमरुणमह वा वण्णं उप्पाइऊण तेल्लस्स ॥
पच्छा उप्पाइज्जइ सुगन्धिआ गन्धजोएहि ॥३९॥

इति पीतमरुणमथवा वर्णमुत्पाद्य तैलस्य ।
पश्चादुत्पाद्यते सुगन्धिता गन्धयोगैः ॥

यस्यकस्यचित् तैलस्य पूर्वदत्तावश्यकपाकद्वयस्य । इत्युक्तेन क्रमेण, हारिद्रं लोहितं वा वर्णं जनयित्वाऽनन्तरं [1]वक्ष्यमाणसुरभिद्रव्यसम्बन्धैः सुरभिता जन्यत इति ॥३९॥

करिकुडिलासारविसाणकंगुविउणं तुरुक्खजलतिउणं ॥
चम्पअतेल्लं तुडिकललदेविभाअद्धसंजुत्तं ॥४०॥

करिकुटिलासारविषाणकङ्गुद्विगुणं तुरुष्कजलत्रिगुणम् ।
चम्पकतैलं त्रुटिकललदेवीभागार्धसंयुक्तम् ॥

१ वक्ष्यमाणसुरभिद्रव्यं दत्त्वा सुरभिता सुगन्धितैलं जन्यत इति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं चम्पकतैलं चम्पककुसुमसदृशसौरभत्वाच्चम्पकोपलक्षितं तैलं भवति । कीदृशम्— करी नागकेसरः, असारं त्वक्, विषाणं कुष्ठम्, कङ्गु प्रियङ्गु । एतानि द्विगुणानि भागद्वयपरिमाणानि यत्र तत्, तथा तुरुष्कं सिह्लक, जलं वालकम्, एते त्रिगुणे भागत्रयपरिमाणे यत्र तत्, तथा सूक्ष्मैलामांसीस्पृक्काणां प्रत्येकं भागार्धेन संयुक्तम् । अनुक्तविशेषाणां तैलानां शुद्धाम्बुपाकक्रमेणैव यद्यपि पाकविधिस्तथाप्यग्निपाकसाध्यमपि तैलं सूर्यपाकेन साध्यमानं न दुष्यतीति ॥४०॥

कइकुडिलकललवक्कलमालाजलकणअकामिणीविउणं ॥
तुडिघणविसाणतिउणं चम्पअतेल्लं घणामोअं ॥४१॥

कपिकुटिलकललवल्कलमालाजलकनककामिनीद्विगुणम् ।
त्रुटिघनविषाणत्रिगुणं चम्पकतैलं घनामोदम् ॥

इदमपरं सान्द्रसौरभं चम्पकतैलम् । कीदृशम्— सिल्हकतगरमांसीत्वक्स्पृक्कावालक-पद्मकप्रियङ्गवो द्विगुणा भागद्वयपरिमाणा यत्र तत्, तथा एलामुस्तकुष्ठानि त्रिगुणानि त्रिभिर्भागैर्युक्तानि यत्र तत् तथेति ॥४१॥

तिउणतुडितअरवक्कलपिअङ्गुसलिलेहि चम्पअसुअन्धं ॥
तेल्लं समकुट्ठलवंगकुन्तिदलकोलभाएहि ॥४२॥

त्रिगुणत्रुटितगरवल्कलप्रियंगुसलिलैश्चम्पकसुगन्धि ।
तैलं समकुष्ठलवङ्गकुन्तीदलकोलभागैः ॥

तृतीयमिदं चम्पकवत् सुगन्ध्यामोदं तैलम् । कैर्द्रव्यैः— त्रिगुणैः प्रत्येकं भागत्रय-परिमाणैरेलाकुटिलत्वक्श्यामावालकैस्तथा समैस्तुल्यैर्विषाणदेवकुसुमहरेणुगन्धपत्रकक्कोल-कानां भागैरिति ॥४२॥

समतुलिअकुवलएलासामामिसिकणअकेसरसणाहं ॥
लहुइअचम्पअगन्धं खररविअरभाविअं तेल्लं ॥४३॥

समतुलितकुवलयैलाश्यामामिसिकनककेसरसनाथम् ।
लघूकृतचम्पकगन्धं खररविकरभावितं तैलम् ॥

इदं सातिशयामोदत्वादल्पीकृतचम्पकसौरभं चतुर्थं चम्पकतैलम् । कीदृशम्— सम-तुलितैस्तुल्यांशैः कुष्ठत्रुटितगर[1]शतपुष्पापद्मकनागकेसरैः सहितम् । तथा तत् तीक्ष्णसूर्यां-शुपक्वम् । सूर्यपाकविधिसाध्यानां तैलानां यद्यपि सामान्येन पक्षमात्रेण पाकोऽभिहितस्तथापि हेमन्तशिशिरयोर्मासमात्रं[1] पाको देय इति ॥४३॥

---

१ अत्र श्यामापर्यायत्वेन तगर आपतित इति विचार्यम् । १ मासमात्रं देयमिति—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समचलमालाकुवलयमसारतुडिकुन्तिकामिणीविउणं ॥
दलकललकुडिलतिउणं तेल्लमिअं मल्लिआमोअं ॥४४॥

समचलमालाकुवलयमसारत्रुटिकुन्तीकामिनीद्विगुणम् ।
दलकललकुटिलत्रिगुणं तैलमिदं मल्लिकामोदम् ॥

इदं मल्लिकानाम्नः पुष्पविशेषस्य तुल्यसौरभं तैलम् । कीदृशम्— समानि तुल्यांशानि सिल्हकस्पृक्काकुष्ठानि यस्मिँस्तत्, तथा द्विगुणाः प्रत्येकं द्वाभ्यां द्वाभ्यां भागाभ्यां युक्ताः स्त्वगेलाहरेणुप्रियङ्गवो यत्र तत्, तथा त्रिगुणानि प्रत्येकं त्रिभिस्त्रिभिर्भागैर्युक्तानि गन्धपत्रमांसीतगराणि यत्र तत् तथा। प्राकृते पूर्वनिपातानियमाद् बहुव्रीहिरेवमन्यत्रापि ज्ञेय इति ॥४४॥

जलकललकुडिलकुवलअकअलेलासारकंगुकुन्तीहि ॥
विउणदलमद्धमालं ससिपाअं मालईतेल्लं ॥४५॥

जलकललकुटिलकुवलयकयलैलासारकङ्गुकुन्तीभिः ।
द्विगुणदलमर्धमालं शशिपादं मालतीतैलम् ॥

इदं मालत्याः सुमनसः पुष्पाणां तुल्यामादं तैलम् । कैर्द्रव्यैः— वालकमांसीतगरकुष्ठकच्चूरत्रुटित्वक्प्रियंगुहरेणुभिः[1] समांशाभिः । कीदृशम्— द्विगुणं द्वाभ्यां भागाभ्यां युक्तं गन्धपत्रं यत्र तत्, तथा अर्धेन भागार्धेन युक्ता स्पृक्का यत्र तत, तथा कर्पूरस्य पादश्चतुर्थभागो यत्र तत् तथेति ॥४५॥

चलजलविसाणवक्कलसामारुणकुडिलकेसरमुराहि ॥
तुडिमीसिआहि तेल्लं विकसिउप्पलप्पडिरूवं ॥४६॥

चलजलविषाणवल्कलश्यामारुणकुटिलकेसरमुराभिः ।
त्रुटिमिश्रिताभिस्तैलं विकसितोत्पलप्रतिरूपम् ॥

इदं [2]विकोशकुवलयसमानामोदं तैलम् । कैर्द्रव्यैः— तुरुष्कबालककुष्ठासारकामिनीकुङ्कुमतगरनागकेसर(सु)गन्धमुराभिरेलामिश्रिताभिः समांशाभिरिति ॥४६॥

चलवारिणलिणितुडिरसकुन्तिमुरासारकअलमिसिसरिसं ॥
ससिविद्धं विउणतमालचारिअरकुवलअं वउलतेल्लं ॥४७॥

चलवारिनलिनीत्रुटिरसकुन्तीमुराऽसारकयलमिसिसदृशम् ।
शशिविद्धं द्विगुणतमालचारीगरकुवलयं वकुलतैलम् ॥

इदं वकुलानां केसरतरुपुष्पाणां सदृशसौगन्ध्यं तैलम् । कीदृशम्— तुरुष्कं तथा बालकं तथा नलिनी तथैला तथा बोलं तथा हरेणुका तथा गन्धवती तथा त्वक् तथा कच्चूरं

१ बृहदेलाभिः– ख. । २ (स)विकासकुवलय–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा शतपुष्पा एतानि समांशानि यस्मिँस्तत् तथा द्विगुणानि भागद्वयपरिमाणानीमानि यत्र तत्, कानि— तमालं गन्धपत्रं तथा चारी [1]स्थानेयकं तथा गरं [2]ग्रन्थिपर्णकं तथा कुवलयं कुष्ठमेतानि । एवंविधं सत् कर्पूरेण समांशद्रव्याणां चलादीनामेकतमस्य चतुर्भागमात्रेण विद्धं दत्तसंस्कारमिति ॥४७॥

णहघुसिणकुडिलकुवलअचलतावसकेसरेहि सरिसेहि ॥
अहिमअरकिरणतविअं तेल्लं लडहंगणादइअं ॥४८॥

नखघुसृणकुटिलकुवलयचलतापसकेसरैः सदृशैः ।
अहिमकरकिरणतापितं तैलं लटहांगनादयितम् ॥

इदं तैलं सुभगवनितावल्लभम् । कैर्द्रव्यैः— नखेन शङ्खेन तथा कुङ्कुमेन तथा तगर-कुष्ठसिल्हकैस्तथा तापसेन दमनकेन तथा केसरेण नागकेसरेणैतैः समांशैः । कीदृशम्— अहिमकरस्योष्णांशोरंशुभिस्तीक्ष्णैर्यथोक्तेन विधिना क्वथितमिति ॥४८॥

एलाजलदलविसाणतअतअरारुणसंखआ ॥
रसमालाचंचलेहि संजुत्ता सरिसंसआ ॥४९॥
सेलेअअविउणभाअमीसिआ कअचुण्णआ ॥
घम्मे तेल्लं कुणन्ति वहलसुअन्धामोअं ॥५०॥

एलाजलदलविषाणत्वक्तगरारुणशंखकाः ।
रसमालाचञ्चलैः संयुक्ताः सदृशांशकाः ॥
शैलेयकद्विगुणभागमिश्रिताः कृतचूर्णकाः ।
घर्मे तैलं कुर्वन्ति बहलशुगन्ध्यामोदकम् ॥

इदं तैलं घर्मे तीक्ष्णातपे यथोक्तविधानेन साधयन्ति । कीदृशम्— सान्द्रसुरभिगन्धम् । कानि द्रव्याण्येतत् तैलं कुर्वन्ति— त्रटिवालकगन्धपत्रकुष्ठत्वक्तगरकुङ्कुमनखाः, वोल-स्पृक्कासिल्हकैः सहिताः, तुल्यभागाः, शैलेयकस्य शिलापुष्पस्य द्विगुणाभ्यां भागाभ्यां सहिताः । एवंकृताः सन्तः सञ्चूर्णिता इति ॥५०-४९॥

दारुरसकुडिलकेसरमालारुणवाणरेहि वढिएहि ॥
पक्कं पसरिअगन्धं तेल्लं सरए णिसेवेह ॥५१॥

दारुरसकुटिलकेसरमालारुणवानरैर्वर्धितैः ।
पक्वं प्रसृतगन्धं तैलं शरदि निषेवध्वम् ॥

एतत् तैलमेतैर्द्रव्यैः पक्वं सत शरत्कालेऽभ्यङ्गादिना भजध्वम् । कैर्द्रव्यैः— देवदारु-वोलतगरनागकेसरस्पृक्काकुङ्कुमसिल्हकैः । कीदृशैः— उत्तरोत्तरभागवृद्ध्या वर्धितैरिति ॥५०॥

१ स्थौणेयकम्(?) । २ यद्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कमवड्ढिअणहवक्कलकडुफलचलसेलसाहिअं तेल्लं ॥
सिसिरे सेवेह सुअन्धिपरिमलं तुहिनपडिपक्खं ॥५२॥

क्रमवर्द्धितनखवल्कलकटुफलचलशैलसाधितं तैलम् ।
शिशिरे सेवध्वं सुगन्धिपरिमलं तुहिनप्रतिपक्षम् ॥

इदं तैलं शिशिरे भजध्वम् । कीदृशम्– सुरभ्यामोदम् अत्युष्णवीर्यत्वात् तुषारप्रतियोगि । कैर्द्रव्यैः साधितम्— शङ्खत्वग्भ्यां तथा कटुफलेन निष्पर्यायेण, उल्लक(?)संज्ञया वा कैश्चिदुक्तेन सिल्हकशैलाभ्यां चैतैरुत्तरोत्तरैकभागवर्द्धितैः पञ्चभिरिति ॥५२॥

णहसलिलकुन्तिआरुणकरिएलाचलणरिन्दमलएहि ॥
कमवड्ढिएहि विहिणा सालससिहिसाहिअं तेल्लं ॥५३॥
हरिचन्दणघणघणसारपङ्कहिमसिसिरमइसअसुअन्धिं ॥
गिह्मे वि विअंभिअसेअसलिलविणिवारणसमत्थं ॥५४॥

नखसलिलकुन्तिकारुणकर्येलाचलनरेन्द्रमलयैः ।
क्रमवर्धितैर्विधिना सालसशिखिसाधितं तैलम् ॥
हरिचन्दनघनघनसारपङ्कहिमशिशिरमतिशयसुगन्धि ।
ग्रीष्मेपि विजृम्भितस्वेदसलिलविनिवारणसमर्थम् ॥

इदं तैलमेतैर्द्रव्यैः सालसे शिखिनि मन्दाग्नौ यथोक्तपाकविधानेन पक्वं सदेवंगुणविशिष्टं भवतीति सम्बन्धः । कैर्द्रव्यैः- शंखवालकपाण्डुपर्णी[१]कुङ्कुमनागकेसरत्रुटिसिल्हकतगरचन्दनैः । कीदृशैः- क्रमबर्द्धितैरुत्तरोत्तरैकभागाधिकैः । किंविशिष्टम्- अत्यन्तसुरभि । तथाऽतिशीतवीर्यत्वात् चन्दनप्रधानसान्द्रकर्पूरकर्दमवत् तुषारवद् वा शीतलम् । अतएव निदाघकालेपि प्रसृतघर्माम्बुप्रशमनशक्तमिति ॥युगलकम्॥५३—५४॥

लहुमालातुरुक्करससेलविणिम्मिअसरिसभाअं ॥
पंचउणंसकुडिलमलउब्भवमह विउणंसणहअं ॥५५॥
तुडितिउणंसमीसमलसाणलसाहिअं सुसुअंधं ॥
तेल्लमिणमं मिअंककिरणावलिसिसिरमणङ्गदइअं ॥५६॥

लघुमालातुरुष्करसशैलविनिर्मितसदृशभागकम् ।
पंचगुणांशकुटिलमलयोद्भवमथ द्विगुणांशनखकम् ॥
त्रुटित्रिगुणांशमिश्रमलसानलसाधितं[२] सुसुगन्धिकम् ।
तैलमिदं मृगाङ्ककिरणावलिशिशिरमनङ्गदयितम् ॥

---

(१) अलर्कसंज्ञया- ऊर्णकसंज्ञया वेति । १ पण्डुपडी-ख. । २ ससुगन्धिकम्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं तैलं चन्द्रमरीचिमालावच्छीतलमतिशयसुभगामोदं चात एव पुष्पचापप्रियम् । कीदृशम्— अगुरुस्पृक्कासिह्लकबोलशैलेयैर्जनितास्तुल्यांशा यस्य, तथा [1]पञ्चगुणांशे प्रत्येकं पञ्चभिर्भागैः संस्थिते तगरचन्दने यत्र, तथा द्विगुणांशो द्वाभ्यां भागाभ्यां (संयुतो) नखः शङ्खो यत्र, तथा एलार्यास्त्रिगुणैरंशैस्त्रिभिर्भागैः संयुक्तम् । एवंविधद्रव्यभागं सन्मृद्वग्निपक्वमिति ॥ युगलकम् ॥ ५५-५६ ॥

णहसलिलकुडिलकुवलअदलघुसिणतुरुक्कबोललहुएहि ॥
कमवड्ढिएहि तेल्लं सिसिरे कुणमालईवासं ॥५७॥

नखसलिलकुटिलकुवलयदलघुसृणतुरुष्कबोललघुकैः[2] ।
क्रमवर्धितैस्तैलं शिशिरे कुतमालतीवासम् ॥

इदं तैलं शिशिरकाले सेव्यम् । कीदृशम्— सम्पादितसुमनःपुष्पाधिवासम् । तत्तुल्यगन्धमित्यर्थः । कैर्द्रव्यैः सिद्धम्— शंखबालकनरेन्द्रविषाणगन्धपत्रकाश्मीरकसिल्लकसागुरुभिः । कीदृशैः— उत्तरोत्तरैकांशातिरिक्तैरिति ॥५७॥

वड्ढिअकरिकुडिलकुवलअदलणहरविदेविबोलभाएहि ॥
कुणह दणुइन्ददइअं णीलुप्पलबासिअं तेल्लं ॥५८॥

वर्धितकरिकुटिलकुवलयदलनखरविदेवीबोलभागैः ।
कुरुत दनुजेन्द्रदयितं नीलोत्पलवासितं तैलम् ॥

इदं तैलं साधयत । कीदृशम्— इन्दीवरैरिव दत्ताधिवासं तत्समानामोदत्वाद् । दनुजेन्द्रस्य मयस्य प्रियं तेन स्वशास्त्रे प्रोक्तत्वात् । कैर्द्रव्यैः— नागकेसरतगरकुष्ठगन्धपत्रशंखानां तथा रवेः कुङ्कुमस्य तथा स्पृक्कारसयोरित्येषामष्टानां क्रमवर्द्धितैर्भागैरिति ॥५८॥

कमवड्ढिअकररुहतुडितमालदलसेलकुवलअगएहि ॥
तेल्लं पाडलापसूणवासिअं कुणह गीम्हम्मि ॥५९॥

क्रमवर्धितकररुहत्रुटितमालदलशैलकुवलयगजैः ।
तैलं पाटलाप्रसूनवासितं कुरुत ग्रीष्मे ॥

इदं तैलं निदाघोपयोग्यं साधयत । कीदृशम्— पाटलाकुसुमसमानसौरभत्वात् तैरिवाधिवासितम । कैर्द्रव्यैः— नखैलागन्धपत्रशैलेयकुष्ठनागकेसरैः । कीदृशैः— उत्तरोत्तरैकभागाधिकैरिति ॥५९॥

घणचण्डासारमुणालदेविगुरुसेलकुवलअजलेहि ॥
तुडिफलिणिवणुम्मीसेहि जूहिआवासिअं तेल्लं ॥६०॥

१ पंचगुणांशो-ख. । २ बोललोहैः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घनचण्डासारमृणालदेवीगुरुशैलकुवलयजलैः[1] ।
त्रुटिफलिनीवनोन्मिश्रैर्यूथिकावासितं तैलम् ॥

इदं तैलं यूथिकया सुरभिपुष्पविशेषेण तुल्यामोदं भवतीति शेषः । कैर्द्रव्यैः—मुस्तक्रोधनिकाभ्यां तथा त्वचोशीरस्पृक्काभिस्तथाऽगुरुणा तथा शैलेयकुष्ठबालकैः । कीदृशैः—एलाप्रियंगुभ्यां तथा वनेन परिपेलवेन युक्तैरित्येतैः समांशैरिति ॥६०॥

घणफलिणिमुणालदेविजलकुवलअणहसेलेअआ ।
तुडिचण्डासारलहुमीसिआ कअसमभागआ ॥६१॥
कअवासा जूहिआइ णिक्खित्ता कअचुण्णआ ।
इति तिलतेल्लं कुणन्ति महुअरहिअआणन्ददं ॥६२॥

घनफलिनीमृणालदेवीजलकुवलयनखशैलेयकाः ।
त्रुटिचण्डासारलघुमिश्रिताः कृतसमभागकाः ॥
कृतवासा यूथिकया निक्षिप्ताः कृतचूर्णकाः ।
इति तिलतैलं कुर्वन्ति मधुकरहृदयानन्ददम् ॥

एतानि द्रव्याणि, इत्यनेन भागक्रमेण, इदं सामोदं तिलतैलं सम्पादयन्ति । कीदृशम्—अतिसुगन्धित्वाद् भृङ्ग(समानां)मनोहर्षदायि । कानि द्रव्याणि— मुस्तप्रियंगूशीरस्पृक्काबालककुष्ठकररुहशिलापुष्पाणि । कीदृंषि एलाक्रोधनिकात्वचागुरुभिः सहितान्येतानि तुल्यांशानि । (पुनः) कीदृंषि— यूथिकया पुष्पविशेषेण सम्पादिताधिवासनानि, ततः सर्वाणि सूक्ष्मपिष्टानि सन्ति तैलमध्ये न्यस्तानि । ततः सूर्यपाकविधिना तत् तैलं साधयन्तीति । शैलेयं नपुंसकम् । प्राकृते तु पुंस्त्वेन प्रयुक्तमिति ॥ युगलकम् ॥६१-६२॥

[2]गुलमहुपुरकालाउरुसालुब्भवसक्कराहि सरिसाहि ॥
भणिओ भाअणधूओ जवणेहि सुअन्धतेल्लाण ॥६३॥

[3]गुडमधुपुरकालागुरुसालोद्भवशर्कराभिः सदृशीभिः ।
भणितो भाजनधूपो यवनैः सुगन्धतैलानाम् ॥

उक्तानां सर्वेषां सुगन्धतैलानां यवनैर्गन्धयुक्तिविदग्धैर्जनैरयं तैलस्थापनभाण्डस्याधिवासको धूप उक्तः । कैर्द्रव्यैः— गुडेनेक्षुविकारेण तथा माक्षिकेण तथा गुग्गुलुलोहाभ्यां तथा सालोद्भवेन सर्जरसेन तथा सितशर्करयेत्येतैः समांशैरिति ॥

—तैलविधिः ॥

कालेअअकणअच्छल्लिकेसररअणिसोहिअं ॥
दमणअसंवलिअमलअमालाकुन्तिसणाहअं ॥६४॥

१ शैलकुवलजलैः-ख. । २ गुरुमहु-ख. । ३ गुरुमधु-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भज्जिअजवचुण्णमीसमइवण्णढ्ढसुअन्धअं ॥
उव्वट्टणअं करेइ घडदासीणं वि अंगअं ॥६५॥

कालेयकक्कनकच्छल्लीकेसररजनीशोभितम् ।
[1]दमनकसंवलितमलयमालाकुन्तीसनाथकम् ॥
भर्जितयवचूर्णमिश्रमतिवर्णाढ्यसुगन्धिकम् ।
उद्वर्तनकं करोति घटदासीनामप्यङ्गकम् ॥

इदमुद्वर्तनं कुम्भदासीनां कर्मकरीणामतिपरुषगात्रमपि गौरं स्वामोदं च संपादयतीति। कीदृशम्—पीतसारसुवर्णच्छल्लीनागकेसरपिण्डहरिद्राभिः शोभमानं तथा [2]दमनेन तापसकेन संवलिताभिश्चन्दनस्पृक्काहरेणुभिः संयुक्तमित्येतैः समांशैः सर्वैर्द्रव्यैस्तुल्यभागपरिमाणेन भर्जितानामक्षतानां पिष्टेन, सक्तुभिरित्यर्थः, सहितमिति। [3]पूर्वकृतगात्राभ्यङ्गे नैतत् जलालोडितमुपयोक्तव्यमिति ॥ युगलकम् ॥ ६४-६५ ॥

गुरुसेलकणअकामिणिकालेअअदलसमं णहद्धंसं ॥
कुंकुमदमणअपाअं लाआसंजोइअं मसिणं ॥६६॥
मालइतेल्लाल्लं कामिणीण सआ कुणइ कणअगोराइ ॥
उव्वट्टणअमइसुन्दरपरिमलसुहआइ अंगाइ ॥६७॥

गुरुशैलकनककामिनीकालेयकदलसमं नखार्द्धांशम् ।
कुङ्कुमदमनकपादं लाजासंयोजितं मसृणम् ॥
मालतीतैलार्द्रं कामिनीनां सदा करोति कनकगौराणि ।
उद्वर्तनकमतिसुन्दरपरिमलसुभगान्यङ्गानि ॥

इदमुद्वर्तनकं सुरभिगन्धसुभगानि तथा हेमसप्रभाणि विलासिनीनां गात्राणि शोभनानि सदा करोति। कीदृशम्— अगुरुशैलेयकपद्मकश्यामापीतसारगन्धपत्राणि समानि तुल्यांशानि यत्र, तथाऽर्धांशो भागार्धपरिमाणः कररुहो यत्र, तथाऽरुणतापसौ पादपरिमाणौ चतुर्भागांशौ यत्र तत् तथाविधं सर्वं चूर्णितं सत् तुल्यांशेन लाजचूर्णेन लाज [4]सक्तुभिः संयोजितम्। एवंविधं सत् सुमनस्तैलार्द्रीकृतमिति ॥युगलकम् ॥ ६६-६७ ॥

—उद्वर्तनविधिः

चणअकलाअमसूराण दलिअणिच्छल्लिआणमेक्केण ॥
सुहगन्धसलिलपरिभाविआण कअधूअवासाण ॥८६॥
एलाविसाणवक्कलकक्के हि जुत्तेण मसिणपिट्ठेण ॥
अह ह्णाणअं मणहरवण्णमिणं कुणह सुसुअन्धं ॥६९॥

---

१ दशनक-ख. । २ दशनेन-ख. । ३ पूर्वकृतगात्रभ्यङ्गेन-ख. । ४ लाजा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चणककलायमसूराणां [1]दलितनिष्तुषीकृतानामेकेन ।
शुभगन्धसलिलपरिभावितानां कृतधूपवासानाम् ॥
[2]एलाविपाणवल्कलकल्कैर्यक्तेन मसृणपिष्टेन ।
अथ स्नानकं मनोहरवर्णमिदं कुरुत सुसुगन्धम् ॥

इदं स्नानकं स्नानार्थं गात्रविरूक्षणमतिसुरभि रम्यप्रभं च सम्पादयत । केन द्रव्येण—चणककलायमसूराणां शस्यविशेषाणां सम्बन्धिनाऽन्यतमेन सूक्ष्मेणातकेन । कीदृशानाम्—प्रथमं [3]द्विदलीकृतानां ततो निष्तुषीकृतानां ततः [4]सुरभिणा जलेन दत्तभावनानां ततः सम्पादितधूमकुसुमाधिवासानाम् । एषां मध्यात् कस्यचित् संबन्धिना पिष्टेन । त्रुटिकुष्ठासारमांसीभिः सर्वाभिस्तत्तुल्यमात्राभिः संयोजितेनेति ॥ युगलकम् ॥ ६८-६९

बहुसो गन्धोअएण भाविअं सुविसुक्खं ॥
बहुधूअपसूअवासवड्ढिअमहुरामोअं ॥७०॥
कच्चूरमुरापिअंगुपेसीजुअं कअचुण्णं ॥
मलणअमिणमब्भत्ताण सुभतण्डुलणिकुरुम्बं ॥७१॥

बहुशो गन्धोदकेन भावितं सुविशुष्कम् ।
बहुधूपप्रसूनवासवर्धितमधुरामोदम् ॥
कर्चूरमुराप्रियंगुपेशीयुतं कृतचूर्णम् ।
मलनकमिदमभ्यक्तानां शुभतण्डुलनिकुरुम्बम् ॥

इदं मलनकं नरपिष्टाख्य उद्वर्तनविशेषो यदभ्यक्तगात्राणां प्रयुज्यते । किं तदुन्मलनकम्—शुभानां सुसितानां व्रीहितण्डुलानां वृन्दमुक्तक्रमेण चूर्णत्वमापादितम् । कीदृशम्—बहुवारं सुगन्धिना जलेन दत्तभावनं सत् तथैव बहुशमपरिधानं(?) ततो बहुना धूपेन [5]तथा पुष्पाधिवासेन विशेषितसुन्दरसौरभं ततः सूक्ष्मपिष्टं सत् कयलसुगन्धमुराफलिनीमांसीभिः सूक्ष्मपिष्टाभिस्तत्समानपरिमाणाभिः सर्वाभिर्मिश्रीकृतं सत् पुनः पिष्टमिति ॥ युगलकम् ॥

चलचोरअकुट्ठमुरापिसल्लिपाएहि तिउणमामलअं ॥
पउरगुलसिप्पिपक्कं मालइकुसुमेहि कअवासं ॥७२॥
एलातअविरइअवेहवड्ढिआमोअमेलिआलिउलं ॥
दणुआहिवदइअमिणं गन्धामलअं णिसेवेह ॥७३॥

चलचोरककुष्ठमुरा[6]पिसल्लीपादेभ्यस्त्रिगुणमामलकम् ।
प्रचुरगुडशुक्तिपक्वं मालतीकुसुमैः कृतवासम् ॥

---

१ दलितनिश्छल्लिकानां-ख. । २ एलात्रिपाणवल्कले-ख. । ३ विदलीकृतानां-ज. । ४ सुरभितेन-ज. ५ दर्षा ख. । ६ पिसल्लीप्रतिभ्यः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एलात्वग्विरचित[१]वेधवर्धितामोदमेलितालिकुलम् ।
दनुजाधिपदयितमिदं गन्धामलकं निषेवध्वम् ॥

इदं गन्धामलकं विशिष्टसौरभसंस्कृतमामलकं केशसंस्कारार्थं भजध्वम् । कीदृशम्— मयाख्यदानवेन्द्रप्रोक्तत्वात् प्रियम् । कीदृशं विधानम्— सिह्लकग्रन्थिपर्णकवाप्यसुगन्धमुरा[२]भूतकेशेभ्यस्त्रिगुणं धात्रीफलं तथा बहुभ्यां गुडनखाभ्यां पक्वमुपरिन्यस्तद्वितीयपत्र(पात्र)घनालेपदानेन परिशोषितं ततो गृहीत्वा सुमनःपुष्पैः स्थापनभाण्डाधिवासनेन विहिताधिवासं, त्र्यूसाराभ्यां चलचतुर्भागमात्राभ्यां प्रयुक्तेन संस्कारेण विशेषितं यत् सौरभं तेनातिसुगन्धित्वादाकृष्टं भ्रमरवृन्दं येन तत् तथाविधमिति ॥ युगलकम् ॥ ७२-७३ ॥

[३]आमलअं तअरतुडिदलघणकुवलअविउणमम्लसुपिट्ठं ।
मणिणहधूविअमइसुरहिपरिमलं वासवेहेहि ॥७४॥

आमलकं तगरत्रुटिदलघनकुवलयद्विगुणमम्लसुपिष्टम् ।
मणिनखधूपितमतिसुरभिपरिमलं [४]वासवेधाभ्याम् ॥

इदं द्वितीयं सुगन्धामलकं निषेवध्वमित्यनुवर्तते । कीदृशम्— कुटिलैलागन्धपत्रमुस्तकुष्ठेभ्यः सर्वेभ्यो द्विगुणमामलकं काञ्जिकेन सुवर्तितं पश्चात् मणिना सर्जरसेन नखेन शुक्तया च पूर्ववद् [५]धूपितं तथा पुष्पाधिवासवेधाभ्यां पूर्वोक्ताभ्यामतिशयसुगन्ध्यामोदमिति ॥७४॥

एलादलदमणअकुडिलसेलकच्चूरमरुवअसमाणं ॥
होइ अइसुरहिपरिमलमामलअं कामिणीदइअं ॥७५॥

एलादलदमनककुटिलशैलकचूरमरुवकसमानम् ।
भवत्यतिसुरभिपरिमलमामलकं कामिनीदयितम् ॥

इदं विलासिनीवल्लभं तृतीयमामलकम् । कीदृशम्— त्रुटिगन्धपत्रमुनिपुत्रतगरशिलापुष्पकयलफणिज्जकैः सर्वैस्तुल्यमात्रम् । अर्थाज्जलपिष्टं सदत्यन्तसुगन्धिसौरभं भवतीति ॥७५॥

वड्ढिअकअलेलासारपत्तमेक्कंस धाणअसणाहं ॥
णीसेसविउणिअगुलअमामलअं मांसलामोअं ॥७६॥

वर्धितकयलैलासारपत्रमेकांश[६]धान्यकसनाथम् ।
[७]निःशेषद्विगुणितगुड(ण)कमामलकं मांसलामोदम् ॥

इदं चतुर्थमामलकंघनसौगन्ध्यं भवति । कीदृशम्— वर्धितान्येकैकांशविशेषितानि कर्चूरत्रुटित्वग्गन्धपत्राणि यत्र तत् तथा प्रथमद्रव्यतुल्यमात्रेण कुस्तुम्बरीफलेनसंयुक्तं तथैतेषां सम्बन्धिना समग्रेण गुड(ण)केन द्विगुणमिति ॥७६॥

—स्नानामलकविधिः॥

१ बिल—ख. । २ प्रतिकेशेभ्यः—ख. । ३ आमलअ—ख. । ४ वासवेधैः—ख. । ५ भूषितं—ख. ।
६ एकैकांश—ख. । ७ नि शेषद्विगुणितमामलक—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कच्चूरकवग्रविसाणघणचंबअसमभाअअं ॥
णिसासेलमुरापिसल्लिसिअसरिसवसंजुत्तअं ॥७७॥
जुत्तीं सव्वोसहिए जअअसमंगलकारअं ॥
सेवहअहालच्छीभूअसअलोपद्दअणासअं ॥७८॥

कर्चूरवचाविषाणघनचंपकसमभागकाम्[1] ।
निशाशैलमुरापिसल्लीसितसर्षपसंयुक्तकाम् ॥
युक्तिं सर्वौषध्या जययशोमङ्गलकारिकाम् ।
सेवध्वमथालक्ष्मीभूतसकलोपद्रवनाशकाम् ॥

अथ सुगन्धामलकानन्तरमिमां सर्वौषध्या स्नानसंविधिशेषस्य युक्तिं प्रयोगं सर्वाङ्गालम्भनेन भजध्वम् । कीदृशीम्— शत्रुविनाशकीर्त्तिकल्याणानां सम्पादिकां तथा दारिद्र्यदुष्टग्रहादिसमस्तदुरितविध्वंसिनीम् । कीदृग्रूपाम्-कयलोग्रगन्धाकुष्ठमुस्तानि तथा चम्पकं हेमपुष्पमेतानि समभागानि यस्यास्तथा हरिद्राशिलापुष्पगन्धवतीमांसीसितसिद्धार्थकैः समांशैरेव संयुक्ताम् । एतानि सर्वाणि समांशानि सूक्ष्मपिष्टानि सर्वौषधिसंज्ञं स्नानोपकरणं भवतीति ॥ युगलकम् ॥ ७७-७८ ॥

सिअसरिसवकुट्ठवआलामज्जअमंसीलोद्धरअणीहि ॥
दारुणिसाचण्णाकामिणीहि [2]गहविहड्डणह्णाणं ॥७९॥

सितसर्षपकुष्ठवचालामज्जकमांसीलोध्ररजनीभिः ।
दारुनिशाचण्डाकामिनीभि[3]र्ग्रहविघट्टनस्नानम् ॥

एताभिरोषधीभिः सूक्ष्मपिष्टाभिः समांशाभिः स्नानीयाभिः सर्वाङ्गसमालम्भनात्मकं सुगन्धामलकादि[4]परिमलनप्रक्षालनानन्तरं स्नानं सर्वदुष्टभूतविनाशनं भवति । काभिः-सितसिद्धार्थकवाप्यवचोशीरपेशीशवरहरिद्राभिस्तथा कटंकटेरीपिशुनाप्रियङ्गुभिरिति ॥७८॥

कमवड्ढिअतुडि[5]मिसितअरकुट्ठसामाखसेहि अङ्गाण ॥
उम्मलणकसाओ रणपिअंगुमलएहि व समेहि ॥८०॥

क्रमवर्धितत्रुटिमिसितगरकुष्ठ[6]श्यामाखशैरङ्गानाम् ।
उन्मलनकषायो रणप्रियंगुमलयैर्वा समैः ॥

---

१ समभागिकाम्-ख. । २ गहविहडणं (?) । ३ ग्रहविघट्टनं-ख. । ४ परिमल-ख. । ५ मिसिग्र-ख. ।
६ श्यामाखशेरसानाम्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ स्नानीयौषधिग्रहणानन्तरमयं गात्राणामुन्मलनार्थं [1]द्रव्यसमुदायः। कैर्द्रव्यैः कृतः— उत्तरोत्तरैकांशविशेषितैरेलाशतपुष्पानरेन्द्रविषाणकामिनीलोध्रैः। [2]अथवोशीरश्यामाचन्दनैः समांशैरिति ॥ ८१ ॥

तअतअरकुट्ठ[6]कन्धरतमालवणचोरएहिं सणहेहि ॥
गन्धमलिवन्दसहिअं मणोहरं अट्ठमंगलअं ॥८१॥

त्वक्तगरकुष्ठ[6]कन्धरतमालवनचोरकैः सनखैः ।
गन्धमलिवृन्दसहितं(?)मनोहरमष्टमङ्गलकम् ॥

इदं गन्धप्रधानत्वाद् गन्धाख्यमष्टभिर्द्रव्यैः सहितमष्टमङ्गलकमष्टानां मङ्गलानां समाहारः। कैर्द्रव्यैः— असारनृपतिकुवलयमुस्तगन्धपत्रपरिपेलवग्रन्थिपर्णकैः सशुक्तिभिः समांशैः। एतच्च मङ्गलार्थमुन्मलनानन्तरं जलकलशादौ क्षिप्त्वा तेन कृतवेधं गन्धद्विचतुष्कं मङ्गलकमिदमपरं [4]गन्धाढ्यं [5]जलं तेन मङ्गलस्नानसम्पत्तये शिरस्यभिषेको देय इति ॥८१॥

चलचोरअ[6]दलवक्कलणरिन्दणहकुट्ठकललसमभाअं ॥
फलससिमअकअवेहं [7]गन्धं विचउक्कमंगलअं ॥८२॥

चलचोरक[6]दलवल्कलनरेन्द्रनखकुष्ठकललसमभागम् ।
फलशशिमदकृतवेधं गन्धं द्विचतुष्कमंगलकम् ॥

इदमपरं गन्धाख्यमष्टमङ्गलकम्। कीदृशम्–सिह्लकग्रन्थिपर्णकतमालत्वक्तगरशुक्तिवाप्यमांसीनां समभागा यस्मिन् तथा जातीफलकर्पूरकस्तूरिकाभिर्वेधयुक्त्या दत्तसंस्कारमिति ॥८२॥

एवमष्टमङ्गलपर्यन्तक्रमिकस्नानविधिं प्रतिपाद्य तत उक्तानामेव प्रयोगाणां यथासम्भवं भेदान्तराण्याह—

तुडिदअणअमिसितअदलपिअंगुघणवारिसेलभाएहि ॥
कमवड्ढिएहि मालइसुअन्धमुम्मलणअं कुणह ॥८३॥

त्रुटिदमनकमिसित्वग्दलप्रियंगुघनवारिशैलभागैः ।
क्रमवर्धितैर्मालतीसुगन्धमुन्मलनकं कुरुत ॥

तत्रोन्मलनकमिदं सुमनःपुष्पवत् सुरभि सम्पादयत। कैर्द्रव्यैः-एलातापसशतपुष्पासारगन्धपत्रफलिनीमुस्तबालकशिलापुष्पाणां समैरंशैः। कीदृशैः- उत्तरोत्तरैकांशवर्धितैरिति ॥८३॥

कुणह कमवड्ढिअमिसिघण[8]जलगिरिकुसुमेहि मालइगन्धं ॥
उव्वट्टणअमसरिसं मज्जणसमए णरिन्दाण ॥८४॥

---

१ दूर्वासमुदायः-ख.। द्रव्यसमुत्काय इति चेत् साधीयान्पाठः २ अथवोशीरकश्यामाक-ख.। ३ कन्तर-ख.। ४ गन्धाख्यं-ख.। ५ जलेन-ख.। ६ जल-ख.। ७ गन्धं-ख.। ८ जलधर-कुसुमेहि-मु.पु.।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुरुत क्रमवर्धितमिसिघन[1] जलगिरिकुसुमै[2] मालतीगन्धि ।
उद्वर्तनक्रमसदृशं मज्जनसमये नरेन्द्राणाम् ॥

इदमपरमुद्वर्तनकं पूर्ववत् सुमनःपुष्पसुरभि राज्ञां स्नानकाले योग्यं सम्पादयत । कीदृशम्— अविद्यमानसमानम् । कैर्द्रव्यैः— [3]उत्तरोत्तरवर्धितैकांशैः शतपुष्पामुस्तबालकशैलेयलवङ्गैरिति ॥ ८४ ॥

जलकललासारविसाणसंखचरणामुरारिदेवीहि ॥
ह्णाणं विणिज्जिआसेसगन्धपसरं सआ कुणह ॥ ८५ ॥

जलकललासारविषाणशंखचरडामुरारिदेवीभिः ।
स्नानं विनिर्जिताशेषगन्धप्रसरं सदा कुरुत ॥

स्नानमिदं नित्यमनुतिष्ठत । कीदृशम्- परिभूतसमस्तद्रव्यान्तरसौरभविकासम् । कैर्द्रव्यैः- बालकमांसीत्वक्कुष्ठनखक्रोधनिकाभिस्तथा मुरारिणा सुगन्धमुरया तथा स्पृक्कयेत्येतै समांशैरिति ॥ ८५ ॥

णहणलिआतअकुवलअफलिणिमुरामांसिसालिसेलेहि ॥
सकइहि कुणह ह्णाणं सुरसुन्दरिमोलिदुल्ललिअं ॥ ८६ ॥

नखनलिकात्वक्कुवलयफलिनीमुरामांसी[4] शालिशैलैः ।
सकपिभिः कुरुत स्नानं सुरसुन्दरीमौलिदुर्ललितम् ॥

स्नानमिदं सम्पादयत । कीदृशम्- अतिप्रकृष्टत्वादमरनारीणां शिरःसु विजृम्भणहेतुकम् । कैर्द्रव्यैः— शुक्तिविद्रुमलतासारकुष्ठप्रियङ्गुगन्धवतीपेशीशालिजातकशिलापुष्पैः सिल्हकसहितैरिति ॥ ८६ ॥

गिरिगुच्छासारविसाणवारिकविकलल्दलघणेलाहि ॥
गन्धिमुराघणतअरेहि कुणह जणवल्लहं ह्णाणं ॥ ८७ ॥

गिरिगुच्छासारविषाणवारिकपिकललदलवनेलाभिः ।
ग्रन्थिमुराघनतगरैः कुरुत जनवल्लभं स्नानम् ॥

स्नानमिदं सकललोकप्रियं सम्पादयत । कैर्द्रव्यैः- शैलेयेन तथा गुच्छाख्येन [5]स्थौणेयकेन तथा त्वक्कुष्ठबालकसिल्हकमांसीगन्धपत्रपरिपेलवत्रुटिभिस्तथा ग्रन्थिना ग्रन्थिपर्णकेन तथा मुरारिमुस्तनृपैरिति ॥ ८७ ॥

---

१ जलधरकुसुमै-ख. । २ मालतीसुगन्धि-ख. । ३ उत्तरोत्तरक्रमवर्धितैकांशैः-ख. । ४ शिलालि-ख, । 'मालि' इति पुस्तकान्तरे । ५ स्थानेयकेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घणपरिपेलवचोरअभाएहि समेहि विरइअं ह्णाणं ॥
मिसिचलणजुअलमिलिअं समत्थदुग्गन्धविद्दवणं ॥८८॥

घनपरिपेलवचोरकभागैः समैर्विरचितं स्नानम् ।
मिसिचरणयुगलमिलितं समस्तदुर्गन्धविद्रावणम् ॥

इदमन्यत् स्नानं सर्वदुरामोदापसारणं भवति । कीदृशम्— एतैर्द्रव्यैर्निर्मितम् । कैः— मुस्तवनग्रन्थिपर्णिकानां तुल्यैरंशैस्तथा शतपुष्पाया [1]घनादीनामेकतमस्य चतुर्थांशद्वयेनार्धेन योजितमिति ॥ ८८ ॥

रसरेणुणलिणिघणवणकइकअलासारकेसरमुराहि ॥
गिरिगुच्छकुडिलसलिलेहि विउणदलमीसिअं ह्णाणं ॥८९॥

रसरेणुनलिनीघनवनकपिकयलासारकेसरमुराभिः ।
गिरिगुच्छकुटिलसलिलैर्द्विगुणदलमिश्रितं स्नानम् ॥

इदमन्यत् स्नानम् । कैर्द्रव्यैः— बोलकुन्तीनलिकामुस्तपरिपेलवसिह्लककर्चूरत्वङ्नागकेसरदानवैस्तथा शिलापुष्प[2]स्थौणेयकनूपबालकैः । कीदृशम्- भागद्वयपरिमाणेन गन्धपत्रेण युक्तम् । पूर्वद्रव्याणामेकतमाद् द्विगुणं गन्धपत्रमत्र देयमिति ॥ ८९ ॥

समतुलिअकररुहेलादलवक्कलघणविसाणभाएहि ॥
ह्णाणं लहुकअचंवअपसूअगन्धं सआ कुणह ॥९०॥

समतुलितकररुहैलादलवल्कलघनविषाणभागैः ।
स्नानं लघूकृतचम्पकप्रसूनगन्धं सदा कुरुत ॥

स्नानमिदं नित्यमाचरत । कीदृशम्— अधरीकृतसुकुमारकुसुमसौरभम् । कैर्द्रव्यैः- तुल्यैर्नखसौदामनीतमालपत्रैस्तथा भृङ्गमुस्तकुष्ठाना[3]मंशैरिति ॥ ९० ॥

कइकललासारमुरापिअंगुगिरिसालिणहविसाणेहि ॥
विद्दुमलआसणाहं विज्जाहरवल्लहं ह्णाणं ॥९१॥

कपिकललासारमुराप्रियंगुगिरिशालिनखविषाणैः ।
विद्रुमलतासनाथं विद्याधरवल्लभं[4] स्नानम् ॥

इदं स्नानं सिद्ध्यनुकूलत्वाद् विद्याधराणां प्रियम् । कीदृशम्- नलिकया सहितम् । अन्यैः कैर्द्रव्यैः- चलमांसी[5]भृंगमृगगन्धवतीश्यामाशिलापुष्पशालिजातकशंखवाप्यैरिति ॥ ९१ ॥

---

१ घनादीनामेकतमचतुर्भागद्वयेन-ख. । २ स्थानेयक-ख. । ३ समांशैरिति-ख. । ४. वल्लभ-ख. । ५ भृंगवतीश्यामा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणगअविसाणकररुहसोआमणिवक्कलेहि रइअस्स ॥
ओहामिअमालइपरिमलस्स ह्णाणस्स [१]कोरणोलं ॥६२॥

रणगजविषाणकररुहसौदामनीवल्कलै रचितस्य ।
परिभूतमालतीपरिमलस्य [२]स्नानस्य [३]किमन्यदलम् ॥

एतैर्द्रव्यैः सम्पादितस्यास्य [४]स्नानस्य कोऽन्यः स्नानविशेषः स्पर्धायां समर्थः । कीदृशस्य-निर्जितसुमनोमकरन्दामोदस्य । कैर्द्रव्यैः— उशीरनागकेसरकुष्ठशुक्तित्रुटित्वचैरिति ॥६२॥

चलसालिसिप्पिवक्कलविणिम्मिअं होइ मणहरं ह्णाणं ॥
लहुइअमअदप्पोद्दामपरिमलं मेलिआलिउलं ॥६३॥

चलशालिशुक्तिवल्कलविनिर्मितं भवति मनोहरं स्नानम् ।
लघूकृतमृगदर्पोद्दामपरिमलं मेलितालिकुलम् ॥

इदं स्नानमेवंविधं भवति । कीदृशम्— अधरीकृतकस्तूरिकाप्रगल्भामोदमत एवाकृष्टमधुकरनिकुरुम्बमत एव हृदयहारि । कैर्द्रव्यैः— कपिपूतिकेशनखत्वचैरिति ॥६३॥

दणुइन्दपिसल्लिकुट्ठतअसमभाअसणाहअं ॥
गरकररुहसुद्धसालिभाअद्धेणाहिअसोहअं ॥६४॥
दइअं सुरसुन्दरीण घुसिणपाउम्मीसिअअं ॥
ह्णाणं वणहत्थिदाणपरिमलसरिसामोअअं ॥६५॥

दनुजेन्द्रपिशल्लीकुष्ठत्वचसमभागसनाथकं ।
गरकररुहशुद्धशालिभागार्धेनाहितशोभकम् ॥
दयितं सुरसुन्दरीणां [५]घुसृणपादोन्मिश्रितकं ।
स्नानं वनहस्तिदानपरिमलसदृशामोदकम् ॥

इदं स्नानं काननकरिमदजलसौरभसमानसौगन्ध्यमतएव त्रिदशयोषितामभीप्सितम् । कीदृशम्— सुगन्धमुरामांसीविषाणासाराणां तुल्यैरंशैर्जनितं तथा ग्रन्थिपर्णिकस्य तथा नखस्य तथा शुद्धस्य कुचर्मरोमादिरहितस्य शालिजातकस्येति त्रयाणां गरादीनां मुराद्यपेक्षया-प्रत्येकमर्धभागेनापादितसौन्दर्यं तथाऽरुणस्य पूर्वापेक्षयैव [६]चतुर्थभागेन संयुक्तमिति ॥ युगलकम् ॥ ६४-६५ ॥

— अर्धस्नानादिस्नानोपकरणसहितस्नानविधिः ॥

---

१ कोऽन्योलमिति प्राकृते पुंस्त्वम् (?) । २ स्नानं-ख. । ३ कोमलः-ख. । ४ स्नानस्य विशेषः-ख. । ५ कुंकुमपादोन्मिश्रितम्-ख. । ६ चतुर्भागेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घणवणदलजलमालाकुवलअकच्चूरकुन्तिसमभाअं ॥
तिहंलामअमुत्ताफलविद्धं [1]विरएह पडवासं ॥९६॥

घनवनदलजलमालाकुवलयकर्चूरकुन्तिसमभागम् ।
त्रिफलामदमुक्ताफलविद्धं विरचयत पटवासम् ॥

वाससामधिवासार्थं चूर्णं साधयत । कीदृशम्— मुस्तपरिपेलवगन्धपत्रबालकस्पृक्काकुष्ठकयलबृहदेलानां तुल्या अंशा यत्र, तथा त्रिफलया पूर्वोक्तया गन्धत्रिफलया तथा कस्तूरिकया तथा मुक्ताफलेन कर्पूरेणेत्येतैर्वेधयुक्तया कृतसंस्कारमिति ॥९६॥

समजलमुणालमालाघणरससामाणरिन्दमलएहि ॥
मिसिकररुहद्धमीसेहि चन्दमअवेहिओ वासो ॥९७॥

समजलमृणालमालाघनरसश्यामानरेन्द्रमलयैः ।
मिसिकररुहार्धमिश्रैश्चन्द्रमदवेधितो वासः ॥

अयमपरः पटवासः । कैर्द्रव्यैः— तुल्यांशैर्वालकोशीरस्पृक्कामुस्तबोलप्रियङ्गुतगरचन्दनैः शतपुष्पानखयोः प्रत्येकं भागार्धेन युतैः । कीदृशः— कर्पूरकस्तूरिकाभ्यां पूर्ववत् कृतवेध इति ॥९७॥

विरएह[2] कमधूअं लक्खाणहपेसिकररुहगुडेहि ॥
जइ इच्छह तरुणिअणं मम्महसरगोअरे णेउं ॥९८॥

विरचयत क्रमधूपं लाक्षानखपेशीकररुहगुडैः ।
यदीच्छथ तरुणीजनं मन्मथशरगोचरे नेतुम् ॥

यदि प्रमदालोकं स्मरसायकविषयं प्रापयितुमभिवाञ्छथ तदैनं क्रमधूपं समनन्तरगाथाव्याख्यास्यमानविधिं सम्पादयत । कैर्द्रव्यैः— द्रुमव्याधिशुक्तिमांसीशंखगुडैरिति ॥९८॥

[3]धूपानां द्विविधा [4]धूपनयुक्तिः— समुदितानां युगपत्, पृथग् दग्धानां च धूपद्रव्याणां क्रमेणेति क्रमधूपस्यास्य वैदग्ध्येन शक्तिविशेषं प्रतिपादयति—

कह कीरउ कमधूओ कररुहजदुकुन्दसलिलजडिलाहि ॥
जो कुणइ कुलबहूण वि सीलविआरं विअम्भन्तो ॥९९॥

कथं क्रियतां क्रमधूपः कररुहजतुकुन्दसलिलजटिलाभिः ।
यः करोति कुलवधूनामपि शीलविकारं विजृम्भमाणः ॥

१ 'विरजइह' इति पाठान्तरम् २ विरजइह—ख. । ३ धूपानां द्विविधा धूपनयुक्तिः समुदिता युगपद्दह्या पृथगदह्या चेति । तत्र पृथग्दह्यानां धूपद्रव्याणां क्रमेणेति (?) । ४ धूपने—ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतैर्द्रव्यैः [1]कथं क्रमधूपः क्रियताम् । न युज्यते कर्तुमित्यर्थः । कुतः— यः प्रसरन् साध्वीनामपि स्मरविकारोद्रेकजनकत्वाच्चरित्रस्य चलतां जनयति । कैर्द्रव्यैः— नखलाक्षा-कुन्दुरुबालकमांसीभिः । अत एकस्मिन् द्रव्ये धूपितप्रशान्ते द्वितीयं धूपनीयमिति क्रमोऽवसेय इति ॥९९॥

णहपुरजलघणलक्खागुडेहि कमधूविआण वत्थाण ॥
धोआण वि वहलसुअन्धपरिमलं णेन्ति गन्धवहा ॥१००॥

नखपुरजलघनलाक्षागुडैः क्रमधूपितानां वस्त्राणाम् ।
धौतानामपि बहलसुगन्धपरिमलान् नयन्ति गन्धवहाः ॥

शुक्तिगुग्गुलुबालकमुस्तद्रुमव्याधिगुडैः क्रमधूपविधिना क्रमेणोक्तया परिपाट्या धूपितानां दत्ताधिवासानां वाससां प्रक्षालितानामपि [1]सान्द्रमादायसौरभं पवनाः प्रसरन्तीति । स्थिरामोदोऽयं धूप इत्यर्थः ॥१००॥

कमवड्ढिअलक्खाकुन्दसालणहमहुसिआअउरुकइहि ॥
[2]कम्बलअचिउररल्लअधूओ सममंसिसहिएहि ॥१०१॥

क्रमवर्धितलाक्षाकुन्दशालनखमधुसिताऽगुरुकपिभिः ।
[2]कम्बलकचिकुररल्लकधूपः सममांसीसहितैः ॥

अयं कम्बलकानामूर्णामृगरोमादिरचितानां शीतकालोचितानां प्रावरणानां तथा चिकुराणां केशानां चामरादिबालानां च तथा [3]रल्लकानां वैचित्र्यास्यूतवस्त्रद्वयघनीकृतानां [4]कन्थाख्यानां परिधानानामधिवासार्थं [5]पिण्डधूपः । कैर्द्रव्यैः— उत्तरोत्तरैकांशविशेषितैस्तरुव्याधिकुन्दुरुसर्जरसशुक्तिमाक्षिकसितशर्करालघुसिह्लकैः । कीदृशैः— सर्वैस्तुल्यमात्रया जटिलया संयुक्तैरिति ॥१०१॥

[6]मिअणाहिमिअंकारुणसिप्पिजडावारिवारणाउरुहि ॥
मलअसिआहि कमवड्ढिएहि धूओ महासारो ॥१०२॥

मृगनाभिमृगाङ्कारुणशुक्तिजटावारिवारणागुरुभिः ।
मलयसिताभ्यां क्रमवर्धितै धूपो महासारः ॥

परमोत्कर्षोयं धूपः । कैर्द्रव्यैः- कस्तूरिकाकर्पूरकुङ्कुमनखमांसीबालकनागकेसरागुरुभिस्तथा चन्दनसितशर्कराभ्यामेतैरुत्तरोत्तरैकभागाधिकैरिति ॥१०२॥

---

१ सान्द्रमपि सौरभाः-ख. । २ कज्जल-ख. । ३ वल्लकानां-ख. । ४ कथाद्यानां-ख. । ५ पिण्डः धूपः-ख. । ६ मअणाहि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णहकविकुवलअचन्दणपिअंगुजलकललसेलगुरुसरिसो ॥
मज्जारपाअसहिओ समगुलसंजोइओ धूओ ॥१०३॥

नखकपिकुवलयचन्दनप्रियंगुजलकललशैलगुरुसदृशः ।
मार्जारपादसहितः समगुडसंयोजितो धूपः ॥

अयं धूप एवंविधः सन्धेयः । कीदृशः— शुक्तिसिह्लकुष्ठमलयश्यामाबालकमांसीशिलापुष्पलोहानि तुल्यमात्राणि नवैतानि यत्र तथा शालिजातकेनैतेषां द्रव्याणामेकतमस्य चतुर्थभागमात्रेण संयुक्तस्तथा सर्वेषां दशानां तुल्यपरिमाणेन गुडेन भावित इति ॥१०३॥

सेलसिवाचलचन्दनतुडितन्दुकुन्दकुवलअणहेहि ॥
पुरसालिसलिलमअलंछणेहि समसक्करो धूओ ॥१०४॥

शैलशिवाचलचन्दनत्रुटितन्दुकुन्दकुवलयनखैः ।
पुरशालिसलिलमृगलाञ्छनैः समशर्करो धूपः ॥

एषोऽपि धूप एवंविधः सन्धेयः । कैर्द्रव्यैः— शिलापुष्पपथ्यासिह्लकमलयैलालाक्षाकुन्दुरुकुष्ठशुक्तिभिर्नवभिस्तथा गुग्गुलुशालिजातकवालकर्पूरैरेतैः सर्वैः समांशैः । एतषां सर्वेषां च तुल्यपरिमाणा सितशर्करा यत्र स तथाविध इति ॥१०४॥

मलअसिवारसकुवलअकररुहसज्जरसविरइओ सगुडो ॥
धूओ थिरवहलसुअन्धपरिमलो कामिणीदइओ ॥१०५॥

मलयशिवारसकुवलयकररुहसर्जरसविरचितः सगुडः ।
धूपः स्थिरबहलसुगन्धिपरिमलः कामिनीदयितः ॥

एवंविधो धूपः स्थायिसान्द्रसुसुरभ्यामोदोऽत एव विलासिनीवल्लभः । कीदृशः— चन्दनहरीतकीबोलकुष्ठनखसालैः समांशैः षड्भिर्निर्मितस्तेषां च सर्वेषां तुल्यमात्रेण गुडेन सहित इति ॥१०५॥

णहकुट्ठचन्दणाउरुसालिसिवासक्कराहि णिम्मविओ ॥
कामिणिहिअआणन्दो धूओ मलआणिलो णाम ॥१०६॥

नखकुष्ठचन्दनागुरुशालिशिवाशर्कराभिर्निर्मितः ।
कामिनीहृदयानन्दो धूपो मलयानिलो नाम ॥

अयं[1] धूपश्चन्दनामोदसंवादान्मलयानिलसंज्ञोऽत एव सुन्दरीमनप्रमोदप्रदः । कीदृशः— शुक्तिकुवलयमलयलघुशालिजातकहरीतकीसितशर्कराभिः समांशाभिः सहित इति ॥१०६॥

१ धूपो घनामोदसम्वादार्थ–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घणसीसतअरणअणो चलगीवो कंगुणिम्मिअसरीरो ॥
करुरुहविरइअपक्खो मंसिमुहो देविकअचरणो ॥१०७॥
एसो विअद्धकामिणिमाणससरसंगवड्ढिअच्छाओ ॥
महुमहुरसद्दसुहओ धूओ कलहंसओ णाम ॥१०८॥

घनशीर्षतगरनयनश्चलग्रीवः [1]कङ्गुनिर्मितशरीरः ।
कररुहविरचितपक्षो मांसीमुखो देवीकृतचरणः ॥
एष विदग्धकामिनीमानससरःसङ्गवर्धितच्छायः ।
मधुमधुरशब्दसुभगो धूपः कलहंसको नाम ॥

एवमयं कलहंसाभिधानो धूपोऽत एव[2] लटभविलासिनीनां हृदयजलाशयसम्पर्कविशेषितशोभः । कलहंसो हि मानसाख्यसरःसम्बन्धवर्धितकीर्तिर्भवति । कीदृशो धूप इति कलहंसतया रूपणानुरूपाणि विशेषणान्याह— मुस्तमेव मस्तको यस्य स तथा । एवं नृपो नेत्रे यस्य, तथा सिह्लकः कण्ठो यस्य, तथा श्यामया कल्पित आकारो यस्य, तथा नखेन निर्मितान्यङ्गरुहाणि यस्य, तथा कललमाननं यस्य, तथा स्पृक्कया विहितौ पादौ यस्य स तथाविधस्तथा माक्षिकमेव सुरसो ध्वनिस्तेन सुन्दरः । द्रव्याणां काव्यवैचित्र्यमात्रार्थं हंसावयवतया रूपणम् । मात्रा तु सर्वेषां समांशैवेति । तेन घनतगरचल[3]कङ्गकररुहमांसीदेवीभिः समांशाभिर्मधुभाविताभिर्धूपोयं सन्धेय इति तात्पर्यम् ॥ युगलकम् ॥१०७-१०८॥

मलअपिसल्लीहिं [4]चउउणाहि कविकररुहेहि सरिसेहि ॥
कुणह सुरतरुणिदइअं महुगुडसंजोइअं धूवं ॥१०९॥

मलयपिशल्लीभ्यां चतुर्गुणाभ्यां कपिकररुहाभ्यां सदृशाभ्याम् ।
कुरुत सुरतरुणीदयितं मधुगुडसंयोजितं धूपम् ॥

धूपमिममसरमणीमनोहरं रचयत । कैर्द्रव्यैः— चन्दनेन मांस्या च चतुर्भिश्चतुर्भिर्भागैः प्रयुक्ताभ्यां तथा सिह्लकेन नखेन चैकैकभागतया समानाभ्याम् । कीदृशम्— माक्षिकगुडाभ्यां भावितमिति ॥१०९॥

सज्जरसमलअकुवलअजलकररुहपेसितेल्लसेलेहि ॥
रसभागद्धुम्मीसेहि सअलजणवल्लहो धूओ ॥११०॥

सर्जरसमलयकुवलयजलकररुहपेसीतैलशैलैः ।
रसभागार्धोन्मिश्रैः सकलजनवल्लभो धूपः ॥

१ कुंकुम-ख. । २ लडभ-ख. । ३ कुंकुम-ख. । ४ चउगुणाहि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अयं समस्तलोकप्रियो धूपः । कैद्र्व्यैः- सालचन्दनकुष्ठबालकनखमांसीसिह्लकशिलापुष्पैः समांशैर्वोऌस्य सर्जरसादिभागानामेकतमादर्धेन युक्तैरिति ॥११०॥

चलमलअसलिलाउरुणहपिसल्लिमहुसक्कराहि सरिसीहि ॥
सिसिरम्मि कुणह धूवं णवकुंकुमपरिमलसुअन्धं ॥१११॥

चलमलयसलिलागुरुनखपिसल्लीमधुशर्कराभिः सदृशीभिः ।
शिशिरे कुरुत धूपं नवकुङ्कुमपरिमलसुगन्धिम् ॥

इमं धूपं शिशिरकाले साधयत । कीदृशम्— प्रत्यग्रकाश्मीरसौरभशोभनामोदम्[1] । कुङ्कुमस्य शिशिरकालोपयोग्यत्वात् तत्सम्वादिसौगन्ध्यम् । तत्र काले धूपमिमं कुरुतेत्युक्तम् । कैद्र्व्यैः— सिह्लकचन्दनबालकलघुशुक्तिमांसीचौद्रसितशर्कराभिरतुल्यमात्राभिरिति ॥१११॥

कविकररुहकालाउरुपिसल्लिजलमलअसक्करासहिअं ॥
णवघुसिणसुरहिगन्धं करेह महुमोइअं धूवं ॥११२॥

कपिकररुहकालागुरुपिसल्लीजलमलयशर्करासहितम् ।
नवकुङ्कुमसुरभिगन्धं कुरुत मधुमोदितं धूपम् ॥

इमं धूपं साधयत । कीदृशम्— चलनखलघुकललबालकचन्दनसितशर्कराभिः समांशाभिर्युक्तं तथा [2]माक्षिकेन मलनयुक्त्या प्रत्युज्जनितामोदमत एव प्रत्यग्रकाश्मीरवत् स्वामोदमिति ॥११२॥

गिरिकुवलअणहकुन्दुरुसज्जरसतुरुक्खमंसिसंजुत्तो ॥
धूओ मम्महइओ तुलिउब्भडघुसिणमाहप्पो ॥११३॥

गिरिकुवलयनखकुन्दुरुसर्जरसतुरुष्कमांसीसंयुक्तः ।
धूपो मन्मथदयितस्तुलितोद्भटकुङ्कुममाहात्म्यः ॥

अयं धूपः स्पर्धितोद्दामकाश्मीरसौरभातिशयः । अतएव कन्दर्पप्रियः । कीदृशः[3]— तुल्यांशाभिः शैलेयकुष्ठशुक्तिसल्लकीनिर्यासराला[4]चलजटिलाभिः संयुत इति ॥११३॥

[5]चलवारिचिउरसुरतरुसीसवासारेहि कुसुमरसमलिओ ॥
धूओ कअगुरुवेहो कालाउरुगन्धसंवाई ॥११४॥

---

१ सौरभघनामोदम्-ख. । २ माक्षिकोन्मलनप्रत्युज्जनितामोदम्-ख. । ३ कीदृशीभिः-ख. । ४ मलदश्मलभिः-ख. । ५ चलवारिचिहुर-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चलचारीचिकुरसुरतरुशिशपासारैः कुसुमरसमलितः ।
धूपः [1]कृतागुरुवेधः कालागुरुगन्धसम्वादी ॥

अयं धूपः [2]श्रेष्ठलोहसौरभसदृशामोदः । कैर्द्रव्यैः— सिल्हकस्थौणेयकबालकदेवदारुभिस्तथा शिंशपाया मण्डलपत्रिकाया नित्त्वचा दारुणेत्येतैः समांशैः । कीदृशः— मधुना मिश्रीकृतस्तथाऽगुरुणा पूर्वद्रव्याणामेकतमाषतुर्भागमात्रेण दत्तसंस्कार इति ॥११४॥

थोणेअअदलचन्दणमिसिसीसवतेल्लमंसिसंजुत्तो ॥
धूवो कुसुमरसोल्लो कीरउ कालाउरुसुअन्धो ॥११५॥

स्थौणेयकदलचन्दनमिसिशिंशपातैलमांसीसंयुक्तः ।
धूपः कुसुमरसार्द्रः क्रियतां कालागुरुसुगन्धिः ॥

अयं धूपः कृष्णागुरुवत्सुन्दरामोदः साध्यताम् । कीदृशः— [3]चारीगन्धपत्रमलयशतपुष्पामण्डलपत्रिकासिल्लककल्लैः समांशैर्युतस्तथा माक्षिकेनार्द्रीकृत इति ॥

सज्जरसमेहकररुहकविकुवलअपेसिविरइअं सिसिरे ॥
धूवं सेवेह सआ कालाउरुपरिमलब्भहिअं ॥११६॥

सर्जरसमेघकररुहकपिकुवलयपेसीविरचितं शिशिरे ।
धूपं सेवध्वं सदा कालागुरुपरिमलाभ्यधिकम् ॥

धूपमिमं शीतकाले भजध्वम् । कीदृशम्— कृष्णागुरुसौगन्ध्यादतिरिक्तम् । यवो मणिमुस्तनखसिह्लककुष्ठजटाभिर्निर्मितमिति ॥११६॥

कमवड्ढिअरोहिणिगुरुपवंगहिङ्गुलुअसक्करासहिओ ॥
उव्वहइ वउलगन्धं सित्थअसंजोइओ धूवो ॥११७॥

क्रमवर्धितरोहिणीगुरुप्लवंगहिङ्गुलुकशर्करासहितः ।
उद्वहति वकुलगन्धं सिक्थकसंयोजितो धूपः ॥

अयं धूपः केसरकुसुमसौरभं धारयति । कीदृशः— उत्तरोत्तरैकांशातिरिक्ताभिः कटुकालोहसिह्लकचर्मारसितशर्कराभिस्तथारोहिणीतुल्यांशेन मधूच्छिष्टेन युक्त[4] इति ॥११७॥

[5]कुन्दसिवाजउचन्दणरोहिणि कम्मारघुसिणकुट्ठेहि ॥
धूवो मइरामलिओ परिवसिओ केसरं जअइ ॥११८॥

---

१ कृतगुरुवेधः-ख. । २ श्रेष्ठलौह-ख. । ३ मारी-ख. । ४ युक्तमिति-ख. । ५ कुन्दु-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]कुन्दशिवाजतुचन्दनरोहिणीकम्मीर[2]घुसृणकुष्ठैः ।
धूपो मदिरामलितः पर्युषितः केसरं [3]जयति ॥

अयं धूपो बकुलपुष्पामोदमभिभवति । कैर्द्रव्यैः— सल्लकीनिर्यासपथ्यालाक्षामलयक-टुकाहिङ्गुलुकारुणवाप्यैः । कीदृशः— सुरयार्द्रीकृतस्तथाविधो रात्रिमेकां पर्युषित इति ॥११८॥

समचलमलउम्मीसिअकडुहिङ्गुलुसक्कराहि विउणाहि ॥
धूवो विकसिअकेसरपसूअलीलं समुव्वहइ ॥११९॥

समचलमलयोन्मिश्रितकटुहिङ्गुलुशर्कराभिर्द्विगुणाभिः ।
धूपो विकसितकेसर[4]प्रसूनलीलां समुद्वहति ॥

अयं धूपः फुल्लबकुलपुष्पामोदविलासं[5] बिभर्ति । कैर्द्रव्यैः— तुल्यांशाभ्यां सिह्लक-चन्दनाभ्यां सहिताभिः [6]कटुफलदरदसिताभिर्द्विगुणाभिः । द्वाभ्यां भागाभ्यां दत्ताभि-रिति ॥११९॥

—चूर्णधूपविधिः ।

घणकइमिअङ्कमालासामारुणसलिलमूइमलएहि ॥
रइआ वत्ती अइसुरहिपरिमला होइ सरिसेहि ॥१२०॥

घनकपिमृगाङ्कमालप्श्यामारुणसलिलमूतिमलयैः ।
रचिता वर्त्तिरतिसुरभिपरिमला भवति सदृशैः ॥

अयं धूमवर्त्तिरेभिर्द्रव्यैर्निर्मिताऽत्यन्तसुगन्धिगन्धसारा सम्पद्यते । कैः— मुस्त[7]प्लव-ङ्गकर्पूरस्पृक्काप्रियङ्गुकुङ्कुमबालकसालिजातकचन्दनैः समांशैः । सर्ववर्त्तीनाममुक्तवर्तन-द्रव्यविशेषाणां जलेनैव वर्तनम् । सर्वासां तु द्रावितेन [8]सिक्थकेनोपरि तत्र लेपो देय इति ॥१२०॥

सममलअसालिजलणहपिअंगुतेल्लेहि कुन्दुरुरसड्ढा ॥
होइ जणहिअअदइआ वालअजलवट्टिआ वत्ती ॥१२१॥

सममलयसालिजलनखप्रियंगुतैलैः कुन्दुरुरसाढ्यः ।
भवति जनहृदयदयिता बालकजलवर्तिता वर्त्तिः ॥

---

१ कुष्ठशिवा–ख. । २ चर्मारकुंकुम–ख. । ३ जनयति–ख. । ४ प्रसूत–ख. । ५ विकासं–ख. । ६. कटुफलदरिदशिलाभिः–ख. । ७ प्रसङ्ग–ख. । ८ सिक्थकेनोपचितभ्र–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इयं वर्त्तिर्ह्रीवेरकथितेन तोयेन रचिता [१]लोकमनोहारिणी भवति। कैद्रव्यैः- तुल्यांशैश्चन्दन प्रतिकेशबालककरजश्यामासिह्लकैः । कीदृशी- [२]अर्धभागौ सल्लकीनिर्यासबोलौ प्रत्येकं यस्यां सा तथेति ॥१२१॥

मअतुहिणाउरुचलमलअमंसिविउणंसवड्ढिआकमसो ॥
होइ सिआजलपिट्ठा विसुद्धजणवल्लहा वत्ती ॥१२२॥

मदतुहिनागुरुचलमलयमांसीद्विगुणांशवर्धिता क्रमशः ।
भवति सिताजलपिष्टा विशुद्धजनवल्लभा वर्तिः ॥

इयं वर्तिश्चोत्तलोकप्रिया भवति । कीदृशी— सितशर्करोदकेन वर्तिता । किंरूपा— कस्तूरिकाकर्पूरलोहसिल्लकचन्दपेसीनामुत्तरोत्तरं द्विगुणैरंशैः [३]कृतवृद्धिः यावच्चतुःषष्टिरंशा मांस्या[४]उपपद्यन्ते इति क्रमार्थ इति ॥१२२॥

[५]कररुहगुरुचलवालअकुन्दुरुगिरिहिमपिअंगुभाएहि ॥
कमवड्ढिएहि रइआ रइवल्लहवल्लहा वत्ती ॥१२३॥

[५]कररुहगुरुचलबालककुन्दुरु[६]गिरिहिमप्रियंगुभागैः ।
क्रमवर्धितै रचिता रतिवल्लभवल्लभा वर्त्तिः ।

इयं वर्त्तिः कन्दर्पप्रिया नाम । कीदृशी— नखागुरुसिह्लकह्रीवेरसल्लकीनिर्यासशैलेय-चन्दनश्यामानामुत्तरोत्तरैकांशवृद्धै रंशैर्निर्मितेति ॥१२३॥

ससिमालातेल्लाउरुसामाजलजलदसालिमलएहि ॥
विरएह धूववत्तिं मअरद्धअवीरिआणामं ॥१२४॥

शशिमालातैलागुरुश्यामाजलजलदशालिमलयैः ।
विरचयत धूपवर्त्तिं मकरध्वजवीरिकां नाम ॥

इमां धूपवर्त्तिं पुष्पायुधशरविशेषाख्यां सन्धत्त । कैर्द्रव्यैः- कर्पूरदेवीसिह्लकलघुप्रियङ्गुह्रीवेरमुस्तवीरचन्दनैः समांशैरिति ॥१२४॥

घुसिणदेविजलजलहरकुडिलसमसामाहि सणाहा ॥
सालितेल्लकुवलअ[७]पिसल्लिसरिसभाअआ ॥१२५॥
[८]विउणसालसिरिवासमलआउरुसुअन्धआ ॥
धूवेण वासेइ दिसावलआइ वत्तिआ ॥१२६॥

---

१ लोके-ख. । २ अर्धभागेन सल्लकीनिर्यासबोलेन-ख. । ३ कृतवृद्धिः-ख. । ४ उत्पद्यन्ते-ख. ।
५ फररुहागुरु-ख. । ६ गुरु-ख. । ७ कलल-ख. । ८ विउणसालि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुङ्कुमदेवीजलजलधरकुटिलसमश्यामाभिः सनाथा ।
शालितैलकुवलय[1] पिसल्लिसदृशभागिका ॥
द्विगुणसालश्रीवासमलयागुरुसुसुगन्धिका ।
धूपेन वासयति दिग्वलयानि वर्तिका ॥

इयं धूपवर्तिका आशामण्डलानि सौगन्ध्येनानुवासयति । कीदृशी- अरुणमालाबालक-मुस्तगरैस्तत्समया च श्यामया सहिता । समांशैः सर्वैर्युक्तेत्यर्थः । तथा शालिजातकसिह्लककुष्ठमांसीनां (समा) भागा यस्याः । तथा द्विगुणैः प्रत्येकं भागद्वयपरिमाणैः सर्जरस[2]वीडासवचन्दनलोहैः सुजातामोदेति ॥१२५-१२६॥

(-धूपवर्त्तिविधिः)

सुरदारुमुरापेलवलक्खाउरुसालचुण्णकअगब्भा ॥
वासेइ [3]दिसावलअं पईवविणिवेसिआ वत्ती ॥१२७॥

सुरदारुमुरापेलवलाक्षागुरुसालचूर्णकृतगर्भा ।
वासयति [3]दिग्वलयं प्रदीपविनिवेसिता वर्त्तिः ॥

एषा प्रदीपन्यस्ता वर्त्तिगगनमण्डलं सुरभयति । कीदृशी— देवदारुगन्धमुरापरिपेलव-जतुलोहसर्जरसानां चूर्णेन पूरिताऽभ्यन्तरा । सुगन्धिवर्तिर्दीपेषु तिलतैलं देयमिति ॥१२७॥

सेलेअअजलकुवलअमलआउरुरइअवत्तिकअगब्भो ॥
सुरहिअवासघरंतरसुन्दरो कीरउ पईवो ॥१२८॥

शैलेयकजलकुवलयमलयागुरुरचितवर्त्तिकृतगर्भः ।
सुरभितवासगृहान्तरसुन्दरः क्रियतां प्रदीपः ॥

अयं दीपः सम्पाद्यताम् कीदृशः- अधिवासितभवनोदरसुभगः । किमात्मकः- शिलापुष्प-बालकविषाणचन्दनलोहैर्निर्मिता याऽसौ वर्त्तिस्तया कृतगर्भः पूरितस्नेहपात्र इति ॥१२८॥

जलकुवलअचलचम्मारदारुलोहसालितण्डुलतिणेहि ॥
वासेइ वासभवणं पईववत्ती कआ विहिणा ॥१२९॥

जलकुवलयचल[4]चर्मारदारुलोहशालितण्डुलतृणैः ।
वासयति वासभवनं प्रदीपवर्तिः कृता विधिना ॥

इयं दीपवर्त्तिर्यथोक्तविधानेन सम्पादिता मन्दिराभ्यन्तरं सुगन्धयति । कैर्द्रव्यैः— ह्रीवेरविषाणवानरवरददेवदार्वगुरुगन्धमार्जारलाक्षातगरैः समांशैरिति ॥१२९॥

१ कलल-ख. । २ सरलद्रव(?) । ३ दिवो वलयमिति व्याख्यानुसारी पाठः । ४ चम्मार-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वोलाउरुकुन्दतेल्लपुरकप्पूरसणाहिआ ॥
सिरिवासअमलअसज्जरससमभाउज्जलवण्णिआ ॥१३०॥
दइआ कुसुमाउहस्स तरुणीअणमणमोहिआ ॥
कीरउ सव्वाअरेण भवणपईपअवत्तिआ ॥१३१॥

वोलागुरुकुन्दतैलपुरकर्पूरसनाथिका[1] ।
श्रीवासकमलयसर्जरससमभागोज्ज्वलवर्णिका ॥
दयिता कुसुमायुधस्य तरुणीजनमनोमोहिका ।
क्रियतां सर्वादरेण भवनप्रदीपकवर्तिका ॥

इयं गृहप्रद्योतकवर्त्तिः सकलबहुमानेन साध्यताम् । कीदृशी— रसलोहसल्लकीनिर्याससिल्हकगुग्गुलुमृगलक्ष्मसंयुक्ता तथा [2]वीयप्रात्रचन्दनसर्जरसानां तुल्यांशैः शोभनच्छाया । ततश्च कामदेवस्य वल्लभा । अतएव युवतिजनहृदयानां मोहकारिणीति युगलकम् ॥१३०-१३१॥

[3]पत्थातण्डुलअकुन्दसिरिसल्लइपुर[4]मालआ ॥
णहवारिविसाणपाअगुलधूअंतरदित्तआ ॥१३२॥
दिण्णा सहसक्कराइ चलचन्दणलहुचन्दआ ॥
विलसन्तिअ दीवअम्मि वड्ढिअसुअन्धामोअआ वत्तिआ

पथ्यातण्डुलककुन्दश्रीसल्लकीपुरमालाः ।
नखवारिविषाणपादगुडधूपान्तरदीप्ताः ॥
दत्ताः सहशर्करया चलचन्दनलघुचन्द्रकाः ।
विलसन्ति च दीपके वर्धितसुगन्धामोदा वर्त्तिकाः ॥

एता वर्तयो युक्त्या प्रदीपके न्यस्ताः सत्यो विशेषितसुरभिद्रव्यसौगन्ध्या विजृम्भन्ते [5]वासगृहादौ । चशब्दः पूर्वप्रयोगापेक्षया समुच्चये । कास्ताः— हरीतकीलाक्षाकुन्दुरुश्रीवासगजप्रिया[6]गुग्गुलुस्पृक्काः सप्त समांशाः । [7]कीदृश्यः- शुक्तिबालककुष्ठानि पादभागानि प्रत्येकं चतुर्भागमात्राणि यस्मात् तादृशेन तेभ्यश्चतुर्गुणेन गुडेन योऽन्तरधूपोऽन्तराधिवासनं तेन दीप्ताः सातिशयामोदाः । किमुक्तं भवति- हरीतक्यादीनि सप्तद्रव्याण्येकैकशः शुक्तिबालक[8]कुष्ठैश्चतुर्गुणगुडे एकीकृतैर्धूपयुक्तैश्चान्तरान्तरैकैकश एव मिश्रीकरणक्रमेणाधिवासनीयानि । यथैता (नि) विलसन्ति तथा तत्संस्कारार्थमधिवासनानन्तरं तेषु दत्ताः

१ सनाथिता (?) । २ वीर्यद्राव (वीजद्राव?) (=सरलद्रव) । ३ पच्छा-ख. । ४ मलिनआ-ख. ।
५ वासगृहादौ च गन्धः-ख. । ६ दारुगुग्गुलु-ख. । ७ कीदृशा-ख. । ८ कुम्भे-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सितशर्करासिह्लकमलयागुरुमृगाङ्का अप्येकैकभागपरिमाणा विलसन्तीति ॥ युगलकम् ॥

—गन्धदीपवर्त्तिः ।

मलअगिरिकङ्गुकेसरदानवकललेहि तुल्लभाएहि ॥
दलिएहि सालकुवलअचलेहि तुडिपाअसहिएहि ॥१३४॥
रसवक्कलद्धपाएहि मसिणपिट्ठेहि मंसलामोअं ॥
गन्धं मणस्सिणीमाणमलणमिणमं सआकुणह ॥१३५॥

मलयगिरि[1]कङ्गुकेसरदानवकललैस्तुल्यभागैः ।
दलितैः सालकुवलयचलैस्त्रुटिपादसहितैः ॥
रसवल्कलार्धपादैर्मसृणपिष्टैर्मांसलामोदं ।
गन्धं मनस्विनीमानमलनमिमं सदा कुरुत ॥

इमं गन्धं सुरभिद्रव्यमयं समालम्भनाद्युपयोगिनं गन्धसंज्ञिनं प्रयोगविशेषं साधयत। कीदृशं— सान्द्रसौरभमत एव नित्यं साधयत। तत् कीदृशमिति— मनस्विनीनां प्रियेषु विषये मन्युकृतगर्वनिर्मथनम्। कैर्द्रव्यैः— चन्दनशिलापुष्पश्यामानागकेशरसुगन्धमुरामांसीभिस्तुल्यांशाभिस्तथा दलितैर्दलत्वमर्धभागत्वमापादितैः सर्जरसकुष्ठसिह्लकैः। कीदृशैः— सूक्ष्मैलानां पादेन चतुर्भागेन युक्तैस्तथा बोलत्वचयोरर्धभागश्चतुर्भागार्धमष्टभागा येषु [2]तथैकीकृत्य सूक्ष्मचूर्णितैरिति युगलकम् ॥१३४-१३५॥

वसुवेअविउणवसुमुणिमिअंकभाअद्धसंखामिलिएहि ॥
मलउब्भवकणअपिअङ्गुसालिणवघुसिणवोलेहि ॥१३६॥
सिग्गुजडारसपिट्ठो मअससिफलकोलवेहिओ गन्धो ॥
अइउज्जलसुअन्धओ कअमालइमल्लिआवासो ॥१३७॥

वसुवेदद्विगुणवसुमुनिमृगाङ्कभागार्धसंख्यामिलितैः ।
मलयोद्भवकनकप्रियंगुशालिनव[3]घुसृणवोलैः ॥
शिग्रुजटारसपिष्टो मदशशिफलकोलवेधितो गन्धः ।
[4]अत्युज्ज्वलसुगन्धिः कृतमालतीमल्लिकावासो ॥

अयं गन्ध एवंविधः। कीदृशः— उत्कृष्टवर्णाढ्यस्तथा सुन्दरामोदः। यतः सुमनोमल्लिकापुष्पैर्दत्ताधिवासभाण्डास्थापनाद्विहितसंस्कारः। कैर्द्रव्यैः— चन्दनपद्मकश्यामाशालि-

१ कुंकुम-ख.। २ तैरेकीकृत्येति। ३ कुंकुमवोलैः-ख.। ४ अत्युज्ज्वलसुगन्ध इति पाठान्तरम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जातकप्रत्यग्रकुङ्कुमरसैः। कियद्भागपरिमाणैः— यथाक्रमं चन्दनादिभिर्वसुभि[1]रष्टभिर्भागैस्तथा वेदैश्चतुर्भिस्तथा द्विगुणैर्वसुभिः षोडशभिस्तथा मुनिभिः सप्तभिस्तथा मृगाङ्केनैकेन भागेन तथा भागार्धेनेत्येवंविधभागसंख्यैः [2]षड्भिरेकीभूतैः। कीदृशो गन्धः— शोभाञ्जनमूलनिस्यन्देन निर्वर्तितस्तथा कस्तूरिकाकर्पूरजातीफलकक्कोलकैश्चन्दनाच्चतुर्भागमात्रैः प्रत्येकं वेधितः कृतसंस्कार इति ॥युगलकम् ॥१३६-१३७॥

कमवड्ढिअमअससिसेलमलअगुरुघुसिणकेसरं कुणह ॥
थिरवहलसुरहिगन्धं विलेवणं पव्वईदइअं ॥१३८॥

क्रमवर्धितमदशशिशैलमलयगुरुघुसृणकेशरं कुरुत ।
स्थिरवहलसुरभिगन्धं विलेपनं पार्वतीदयितम् ॥

इदं समालम्भनं पार्वतीदयितं नाम साधयत । कीदृशम्— उत्तरोत्तरैकांशवृद्धानि कस्तूरिकाकर्पूरशिलापुष्पचन्दनलोहारुणनागकेशराणि यस्मिँस्तत् तथा। अत एव[3]दृढसान्द्रसुभगामोदमिति ॥१३८॥

लवलीफलकङ्गुमुणालवारिभाएहि चन्दणं सरिसं॥
मालइवासं गिह्मे विलेवणं चन्दवेहेण ॥१३९॥

लवलीफलकङ्गुमृणालवारिभागैश्चन्दनं सदृशम् ।
मालतीवासं ग्रीष्मे विलेपनं [4]चन्द्रवेधेन ॥

इदं विलेपनं निदाघकालोपयोगि सन्धेयमित्यर्थः । कैर्द्रव्यैः— लवलीफलेन लताकस्तूरिकया तथा फलिनीरणवालकैः समांशैः। एषां च सर्वेषां तुल्यं चन्दनम् । कीदृशम्— सुमनःपुष्पैर्दत्ताधिवासं तथा कर्पूरेण कृतवेधमिति ॥१३९॥

[5]कुन्दरसकुसुमफलणहकोलअकललेहि वड्ढिअभाएहि ॥
समचन्दणेहि सरए विलेवणं चन्दमअविद्धं ॥१४०॥

[6]कुन्दरसकुसुमफलनख[7]कोलककललैर्वर्धितभागैः ।
समचन्दनैः शरदि विलेपनं चन्द्रमदविद्धम् ॥

इदं विलेपनं शरत्कालोपयोगि । कैर्द्रव्यैः— कुन्दुरुवोललवङ्गजातीफलशुक्तिकक्कोलकमांसीभिरुत्तरैकांशवृद्धाभिः, समं सर्वेषां तुल्यं चन्दनं येषां तैः। तथा कर्पूरकस्तूरिकाभ्यां दत्तवेधमिति ॥१४०॥

---

१ रष्टभिः-ख. । २ सद्भि-ज. । ३ दृढसान्द्र-ख. । ४ चन्दनवेधेन-ख. । ५ कुन्दुरुकुसुमफल-ख. । ६ कुन्दुरुसकुसुम-ख. । ७ गोलक-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]मिसिरसकुवलअमालागअकुडिलमुणालसलिलजलएहि ॥
कमवड्ढिएहि मअचन्दबिद्धमिसिधूविओ गन्धो ॥१४१॥

मिसिरसकुवलयमालागजकुटिलमृणालसलिलजलदैः ।
क्रमवर्धितैर्मदचन्द्रबिद्धमिसिधूपितो गन्धः ॥

अयं गन्ध एवंविधः । कीदृशः— [2]पूर्वमेभिर्द्रव्यैः साधितः सन् कस्तूरिकाकर्पूराभ्यां कृतवेधः पश्चात् शतपुष्पया धूपितः । कैर्द्रव्यैः— शतपुष्पावोलकुष्ठस्पृक्कानागकेशरतगरोशीरवालकमुस्तैरुत्तरोत्तरैकांशातिरिक्तैरिति ॥१४१॥

चलमलअघुसिणकररुहगुरुगअतुल्लं णिसाकरद्धंसं ॥
गन्धं कुणह सुअन्धं कररुहगुलधूविअं विहिणा ॥१४२॥

चलमलय[3]घुसृणकररुहागुरुगजतुल्यं निशाकरार्धांशम् ।
गन्धं कुरुत सुगन्धि कररुहगुडधूपितं विधिना ॥

गन्धमिमं शोभनामोदं साधयत । कीदृशम्— सिल्हकचन्दनकाश्मीरकनखलघुनागकेशराणि समांशानि यस्मिन् तं तथा कर्पूरस्यार्धांश एकतमद्रव्यभागार्धं यस्मिन् तं तथा पश्चात् नखगुडाभ्यामुक्तेन विधिना दत्तधूपम् । विधिश्च— [4]अधिवासनद्रव्यस्य चूर्णेन गन्धोदकादिनाऽऽलोडितेन पात्रमुपलिप्य द्वितीयस्य मृदग्निगर्भस्य न्यस्तधूपद्रव्यस्य पात्रस्योपरि तेन धूमेन शोषणीयं, शुष्कं सत् ततो योज्यमिति धूपितं भवतीति ॥१४२॥

एक्केक्को तुडितआण दो दणुअहिवभाआ ॥
चदुआर पिसल्लीए वसुसमकालेअउम्मीसा ॥१४३॥
दत्तूण पिअंगुइ सोलह कुणह सुअन्धं ॥
गन्धं कमधूवएण मअमिअलंछणविद्धं ॥१४४॥

एकैकस्त्रुटित्वचोर्द्वौ दनुजाधिपभागौ ।
चत्वारः पिसल्ल्या वसुसम [5]कालेयकान्मिश्रिताः ॥
दत्त्वा प्रियंगोः षोडश कुरुत सुगन्धि ।
गन्धं क्रमधूपकेन मदमृगलाञ्छनविद्धम् ॥

गन्धमिमं सुभगसौरभमत्यन्तं साधयत । कथम्– सूक्ष्मैलासारयोः प्रत्येकमेको भागस्तथा सुगन्धमुराया द्वौ तथा चत्वारो मांस्याः । कीदृशाः— वसुसमैरष्टभिर्भागैस्तगरस्य(?)

१ सिसिरकुवलय–ख. । २ पूर्वैर्द्रव्यैः साधितः सकस्तूरिका–ख. । ३ कुंकुम–ख. । ४ अधिवासस्य द्रव्यचूर्णेन ख. । ५ कालेपलोन्मिश्रिताः–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहितास्तथा फलिन्याः षोडश भागान् दत्त्वा, एवंभागक्रमेण सर्वं चूर्णीकृत्य पश्चात् कस्तूरिकाकर्पूराभ्यां कृतवेधं क्रमधूपेण सुगन्धिं कुरुत । क्रमधूपस्य विधिः प्रागुक्तो धूपनस्य चेति ॥१४३-१४४॥

[1]घुसिणअसालिमुराकललगण्ठिमिअलंछणेहि वड्ढेहि ॥
वेहं समं सुअन्धाण कुणह मअदप्पपडिरूवं ॥१४५॥

कुङ्कुमशालिमुराकलत्वग्रन्थिमृगलाञ्छनैर्वृद्धैः ।
वेधं [2]समं सुगन्धानां कुरुत मृगदर्पप्रतिरूपम् ॥

इदमुक्तानां वेधनीयानां सुगन्धानां साधारणं वेधं कुरुत । कीदृशम्— कस्तूरिकासौरभस्पर्धिनम्[3] । कैर्द्रव्यैः- अरुणशालिजातकसुगन्धमुरामांसीग्रन्थिपर्णककर्पूरैरुत्तरोत्तरैकांशवृद्धैर्वेधमात्रयेति ॥१४५॥

एलामुणालचन्दणजलहरतअकणअमंसिसहिएहि ॥
अच्चन्तसुरहिगन्धं कढिअं गन्धोअअं होइ ॥१४६॥

एलामृणालचन्दनजलधरत्वचकनकमांसीसहितैः ।
अत्यन्तसुरभिगन्धं क्वथितं गन्धोदकं भवति ॥

इदं सुरभिजलं क्वाथविधिना साधितं सत् सम्पद्यते । कीदृशम्— अतिशयसुगन्ध्यामोदम् । कैर्द्रव्यैः— त्रुटिरणमलयमुस्तवल्कलपद्मककललैः समांशैरिति ॥१४६॥

जलजलअमुणालमुरामंसीकविमलअकाढिअं विहिणा ॥
तिहलैलादलवणअरविद्धं गन्धोदअं भणिअं ॥१४७॥

जलजजलदमृणालमुरामांसीकपिमलयक्वाथितं विधिना ।
त्रिफलैलादलवनचरविद्धं गन्धोदकं भणितम् ॥

इदमपरं गन्धोदकमुक्तम् । कीदृशम्— वालकमुस्तोशीरसुगन्धमुरापेशीचलचन्दनैः समांशैर्यथोक्तविधानेन क्वथितं सुगन्धत्रिफलयात्रुट्या गन्धपत्रेण तथा[4]वनचरेण शालिजातकेनेत्येतैः समांशैर्वेधमात्रया कृतवेधमिति ॥१४७॥

मलअजलजलहरोसीरकङ्गु कढिएण णिम्मलजलेण ॥
पिट्ठा विहिणा पक्का गन्धा अइसुन्दरा होन्ति ॥१४८॥

मलयजलजलधरोशीरकङ्गुक्वथितेन निर्मलजलेन ।
पिष्टा विधिना पक्का गन्धा अतिसुन्दरा भवन्ति ॥

१कुंकुम-ख. । २ सम-ख. । ३ स्पर्धितम्-ख. । ४ वनचरेण तथा-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वोक्ता गन्धा वक्ष्यमाणाश्चैवंविधाः सन्तोऽत्यन्तसुरभयो भवन्ति । कीदृशाः— पिष्टा वर्तिताः । केन— स्वच्छोदकेन । कीदृशेन— क्वाथयुक्तिसाधितेन । कैर्द्रव्यैः— चन्दन-वालकमुस्तरणप्रियङ्गुभिः । पश्चात् पिष्टाः सन्तः पक्काः पूर्वोक्तविधिना क्रमधूपेन धूपिताः । पूर्वोक्तानि गन्धोदकानि सर्वाणि सर्वगन्धानां पेषणविधौ नियोज्यमिति ॥१४८॥

सिअमिरिअकन्दजलपिट्ठसालिमुरपेसिकंगुसमभाअं ॥
गन्धं मिअणाहिसमंगुलकररुहधूविअं कुणह ॥१४९॥

[1]सितमरिचकन्दजलपिष्टशालिमुरपेसी[2]कङ्गुसमभागम् ।
गन्धं मृगनाभिसमं गुडकररुहधूपितं कुरुत ॥

इमं गन्धं सम्पादयत । कीदृशम्— कस्तूरिकासदृशामोदम् । किमात्मकम्- श्वेतमरि-च[3]कन्दजलेन शोभाञ्जनमूलरसेन वर्तितानां शालिजातक[4]सुगन्धमुरामांसीफलिनीनां तुल्या अंशा यस्मिन् स तथा तम् । पश्चाद् गुडनखाभ्यां पूर्वोक्तधूपनविधिना धूपित-मिति ॥१४९॥

रसपंचभाअसणाहसालिमुरसेलवड्ढिअं कमसो ॥
गन्धं गुडणहपक्कं केअइवासेण मअसरिसं ॥१५०॥

रसपंचमभागसनाथशालि[5]मुरशैलवर्धितं क्रमशः ।
गन्धं गुडनखपक्वं केतकीवासेन मदसदृशम् ॥

इमं गन्धं कस्तूरिकातुल्यामोदं कुरुतेत्यनुवर्तते । कीदृशम्— वोलात् पञ्चमेनांशेन संयुक्तं यत् शालिजातकं तस्मात् क्रमवर्धिताभ्यां [6]मुराशिलापुष्पाभ्यां संयुक्तं ततो गुडनखाभ्यां पूर्वोक्तविधिना धूपितम् । ततः केतकीपुष्पाधिवासेनोक्तरूपं भवतीति ॥१५०॥

वोलसालिकविदणुवइपेसिजलंसा ॥
वणपिअंगुसेलेहि समं कमवड्ढिआ ॥
सिप्पिचन्दसिआसिल्हअधूवसणाहा ॥
कुसुमवासवेहिआ होन्ति विणिज्जिअदप्पआ ॥

वोलशालिकपिदनुपतिपेसीजलांशाः ।
वनप्रियङ्गुशैलैः समं क्रमवर्धिताः ॥
शुक्तिचन्द्रसितासिह्लकधूपसनाथाः ।
कुसुमवासवेधिता भवन्ति विनिर्जितदर्पाः ॥

---

१ श्वेतमरिच-ख. । २ कुंकुम-ख. । ३ कन्देन-ख. । ४ मुरारिपेसीफलिनीनां-ख. । ५ मुरा-ख. । ६ मुरारि-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतेषां द्रव्याणामंशा एवंविधाः सन्तोऽभिभूतकस्तूरिकासौरभा भवन्ति । केषाम्-रसपूतिकेशसिल्लकमुरामांसीवालकानां तथा परिपेलवश्यामाशिलापुष्पाणाम् । कीदृशाः—एतेषां सर्वेषां नवानामुत्तरोत्तरैकांशवृद्ध्या वर्धितास्ततो नखकर्पूरशर्कराकपीनां सम्बन्धिना धूपेन पूर्ववत्प्रयुक्तेन युक्तास्तथा पुष्पाधिवासेन यथेष्टेन, विधिना च साधारणेनोक्तरूपा भवन्तीति ॥१५०॥

घणकुडिलकुलिसदलवक्कलेहि सरिसेहि कुणह सअ सुलहं ॥
गन्धं घणसमअविअसिअमालईकुसुमसमगन्धं ॥१५१॥

घनकुटिलकुलिशदलवल्कलैः सदृशैः कुरुत सदा सुलभम् ।
गन्धं घनसमयविकसितमालतीकुसुमसमगन्धम् ॥

इमं गन्धं सम्पादयत । कीदृशम्— [1]वर्षाकालप्रफुल्लसुमनःपुष्पसमानामोदं तथा सदा सुप्रापम् । कैर्द्रव्यैः— मुस्ततगराभ्यां तथा कुलिशेन(...[2]...)तथा गन्धपत्रत्वग्भ्यामिति सर्वैः समांशैरिति ॥१५१॥

विउणपिअंगुम्मीसिअथोणेअचलजडाहि सरिसाहि ॥
कुणह मिसिचरणविद्धं फुल्लं बुहसेविअं वउलं ॥१५२॥

द्विगुणप्रियंगून्मिश्रितस्थौणेयक[2]चलजटाभिः सदृशीभिः ।
कुरुत मिसिचरणविद्धं फुल्लं बुधसेवितं वकुलम् ॥

वकुलाभिधानं गन्धमिमं साधयत । कीदृशम्— विकसितं सत् तद्विशारदैरुपभुक्तम् । किंरूपम्- द्विगुणया भागद्वयपरिमाणया फलिन्या युक्ताभिश्चारीसिल्लकमांसीभिः समांशाभिः सहितं तथा शतपुष्पया स्थौणेयकाच्चतुर्थभागमात्रया विद्धमिति ॥१५२॥

कमवड्ढिअचलथोणेअअमलअमिसिचरणमेलिअं कुणह ॥
वउलं सअलदिसामुहपसरिअथिरमंसलामोअं ॥१५३॥

क्रमवर्धितचलस्थौणेयकमलयमिसिचरणमेलितं कुरुत ।
वकुलं सकलदिङ्मुख[3]प्रसृतस्थिरमांसलामोदम् ॥

इमं वकुलाख्यं गन्धं [4]सन्धत्त । कीदृशम्- सर्वाशावदनविजृम्भि(त)दृढसान्द्रसौरभम् । किंरूपम्— उत्तरोत्तरैकांशातिरिक्तैः सिल्हकचारीचन्दनैः सह शतपुष्पायाश्चलाच्चतुर्थभागेन[5] संयुक्तमिति ॥१५३॥

---

१ वर्षाकाले-ख. । २ बल-ख. । ३ प्रसूत-ख. । ४ साधयत(?) । ५ दलाच्चतुर्भागेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिसिचलमालाथोणेअएहि कमवड्ढिएहि विरएह ॥
णवणिम्बसारसहिअं णहपाउम्मीसिअं वउलं ॥१५४॥

मिसिचलमालास्थौणेयकैः क्रमवर्धितैर्विरचयत ।
[1]नवनिम्बसारसहितं नखपादोन्मिश्रितं वकुलम् ॥

इमं वकुलाख्यमपरं गन्धं योजयत । कैर्द्रव्यैः— उत्तरोत्तरैकांशातिरिक्तैः शतपुष्पासिल्हकस्पृक्कागुच्छैस्तथा नवेन प्रत्यग्रेण निम्बत्वचा (?) मिसितुल्यांशेन सहितं तथा शुक्त्या तच्चतुर्थांशपरिमाणया मिश्रितमिति ॥१५४॥

[2]हिमणअणो सामारइअकवोलओ ॥
चलहत्थओ पत्थादीहरपुच्छओ ॥
मिसिवअणओ समरपरिट्ठिअचरणओ ॥
अइभद्दओ विअरइ वउलगइन्दओ॥१५५॥

हिमनयनः श्यामारचितकपोलश्चलहस्तः पथ्यादीर्घपुच्छः ।
मिसिवदनः समरपरिस्थितचरणोऽतिभद्रो विचरति वकुलगजेन्द्रः॥

अयमुत्कृष्टत्वाद् गजेन्द्रेण रूपितो वकुलाख्यो गन्धो विजृम्भते । कीदृशः— चन्दनलोचनः फलिनीकल्पितगण्डस्थलः सिल्हककरो हरीतकीदीर्घलाङ्गूलः शतपुष्पामुख उशीरस्थिरपदः । अत एवात्यन्तोत्कृष्टः । गजेन्द्रश्चातिशयवत्या भद्रजात्या युक्तो भवति । द्रव्याणां सर्वेषांसमांशता । वैचित्र्याय गजावयवत्वेन रूपणमिति ॥१५५॥

वोलद्धभाउम्मीसिअचलचरणसणाहकंगुकुडिलेहि ॥
भाअतुलिएहि कीरउ गन्धो णवमालिआसरिसो ॥१५६॥

वोलार्धभागोन्मिश्रितचलचरणसनाथकङ्गुकुटिलाभ्याम् ।
भागतुलिताभ्यां क्रियतां गन्धो नवमालिकासदृशः ॥

अयं प्रचुरप्रसवाकुसुमसमानामोदो गन्धः साध्यताम् । कैर्द्रव्यैः— रसस्य भागार्धेन सहिताभ्यां सिह्लकचतुर्भागेन च सहिताभ्यां फलिनीतगराभ्यां तुल्यांशाभ्यामिति ॥१५६॥

रसपाउम्मीसविसाणवारिलहुमलअकुडिलभाएहि ॥
कुणह सइ सुरहिचम्पअपसूअघणपरिमलं गन्धं ॥१५७॥

रसपादोन्मिश्रितविषाणवारिलघुमलयकुटिलभागैः ।
कुरुत सदासुरभि[3]चम्पकप्रसूनघनपरिमलं गन्धम् ॥

---

१ नवनिम्बसार–ख. । २ हिनणअण–ख. । ३ चम्पकप्रसूत–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इमं नित्यसुगन्धिचाम्पेयकुसुमवत् सान्द्रसौरभं गन्धं साधयत । कैः— वोलस्योत्तरद्रव्याणामेकतमस्य चतुर्थांशेन मिश्रितानां कुष्ठवालकागुरुचन्दनतगराणां समैरंशैरिति ॥१५७॥

विउणंसतअरुम्मीसिअमलउप्पलाउरुरसेहि सरिसेहि ॥
गन्धं णवचम्पअसुरहिकुसुमथिरपरिमलं कुणह ॥१५८॥

द्विगुणांशतगरोन्मिश्रितमलयोत्पलागुरुरसैः सदृशैः ।
गन्धं नवचम्पकसुरभिकुसुमस्थिरपरिमलं कुरुत ॥

इमं गन्धं प्रत्यग्रचाम्पेयसुगन्धिपुष्पवत् चिरस्थायिसौरभं साधयत । कैः— द्विगुणांशेन भागद्वयपरिमाणेन कुटिलेन सहितैश्चन्दनकुष्ठलघुवोलैः सदृशैरिति ॥१५८॥

एक्केक्को कुवलअवक्कलाण चलचलणमीसिओ भाओ ॥
विउणिअधणिआसारो कुज्जअगन्धे सुअन्धम्मि ॥१५९॥

[1]एकैकः कुवलयवल्कलयोश्चलचरणमिश्रितो भागः ।
द्विगुणितधानकासारः [2]कुब्जकगन्धे सुगन्धौ ॥

अस्मिन् [3]कुरबकपुष्पतुल्यामोदत्वात् कुब्जकाख्ये गन्धे । कीदृशे— सुरभौ । अयंद्रव्यक्रमः— कुष्ठत्वचोः प्रत्येकमेकोंशः । कीदृशः— सिल्हकस्य कुष्ठापेक्षया चतुर्थेनांशेन सहितस्तथा भागद्वयपरिमाणेन निस्तुषीकृतेन जलशोधितेन कुस्तुम्बुरीफलेन युक्त इति ॥१५९॥

एक्को चलचलणुम्मीसवण्णतअकुवलएहि रमणीओ ॥
अण्णो कमविउणतुरुक्कतम्बघणकेसरो होइ ॥१६०॥

एकश्चलचरणोन्मिश्रवन्यत्वक्कुवलयै रमणीयः ।
अन्यः[4]क्रमद्विगुणतुरुष्कताम्रघनकेसरो भवति ॥

एको गन्धः सिल्हकस्य चतुर्थेनांशेन युक्तः परिपेलवत्वक्कुष्ठैर्हृद्यो द्वितीय उत्तरोत्तरद्विगुणानि सिल्हकत्वग्मुस्तनागकेशराणि यस्मिन् तादृश इति ॥१६०॥

एक्को तअकेसरधणिणएहि गुलसालिधूइओ सुरही ॥
अण्णो चलधणिआवक्कलेहि अइमंसलामोओ ॥१६१॥

एकस्त्वक्केसरधानकाभिर्गुडशालिधूपितः सुरभिः ।
अन्यश्चलधानकावल्कलैरतिमांसलामोदः ॥

---

१ एकैको कुवलयवल्कलानां–ख. । २ कुब्जकगन्ध–ख. । ३ करेटपुष्प–ख. (कुब्जकपुष्प?) ।
४ क्रमवर्धिगुण–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एको गन्धस्ताम्रनागकेशरकुस्तुम्बरीफलैः शोधितैर्गुडशालिजातकाभ्यां[1] धूपितोऽत एव सुगन्धिः । अपरः सिल्हकशोधितकुस्तुम्बरीफलत्वचैरत एव सान्द्रसौरभ इति ॥१६१॥

इअ कुज्जअकुसुमसुअन्धसुहअघणपरिमला इमे होन्ति ॥
गाहाजुअलअरइआ चत्तारि मणोहरा गन्धा ॥१६२॥

इति कुब्जककुसुमसुगन्धिसुभगघनपरिमला इमे भवन्ति ।
गाथायुगलकरचिता चत्वारो मनोहरा गन्धाः ॥

कुब्जकं करेटपुष्पम् । शिष्टं गाथाद्वयोक्तगन्धचतुष्टयसङ्ग्रहणार्थं स्पष्टमिति ॥१६२॥

धणिअअमिसिचंचलकुवलएहि कमवड्ढिएहि विरएह ॥
मुहरालिवलअपिरज्जन्तपरिमलं कुवलआमोअं ॥१६३॥

धानकामिसिचञ्चलकुवलयैः क्रमवर्धितैर्विरचयत ।
[2]मुखरालिवलयपीयमानपरिमलं कुवलयामोदम् ॥

इमं गन्धमिन्दीवरसदृशसौरभमतएव ध्वनन्मधुकरकुललिह्यमानमकरन्दं साधयत । कैर्द्रव्यैः— शोधितकुस्तुम्बुरीफलशतपुष्पासिल्हककुष्ठैरुत्तरोत्तरैकांशवृद्धैरिति ॥१६३॥

समदलवालअचन्दणकुवलअभाअद्धमीसमिसिपाअं ॥
गन्धं कुणह सुअन्धं विअसिअउप्पलप्पडिरूवं ॥१६४॥

समदलबालकचन्दनकुवलय[3]भागार्धोन्मिश्रमिसिपादम् ।
गन्धं कुरुत सुगन्धि विकसितोत्पलप्रतिरूपम् ॥

इमं गन्धं फुल्लकुवलयामोदस्पर्धिनमतएव सुरभिं सन्धत्त । कीदृशम्— तुल्यांशानि गन्धपत्रह्रीबेरमलयानि यस्मिन् तथा कुष्ठस्यार्धभागेन सहितः शतपुष्पायाश्चतुर्थांशो [4]यस्मिन् तथाभूतमिति ॥१६४॥

कमवड्ढिआहि कीरउ सअपुप्फाचलविसाणफलिणीहि ॥
णवकुवलअगन्धसुअन्धसिसिरघणपरिमलो गन्धो ॥१६५॥

क्रमवर्धिताभिः क्रियतां शतपुष्पाचलविषाणफलिनीभिः ।
नवकुवलयगन्धसुगन्धिशिशिरघनपरिमलो गन्धः ॥

अयं गन्धः प्रत्यग्रोत्पलसौरभस्पर्धिशीतलसान्द्रसौरभः सम्पाद्यताम् । कैर्द्रव्यैः— उत्तरोत्तरैकांशातिरिक्ताभिर्मिसिसिल्हककुष्ठश्यामाभिरिति ॥१६५॥

शालिशालिजातकाभ्यां-ख. । २ मुखरालिवय (चय?)-ख. । ३ भागार्धोन्मिश्रित-ख. । ४ यस्मिन् स तथा तमिति-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एक्को चलस्स दो कुवलअस्स चत्तारि फलिणिकुसुमाण ॥
मिसिथोअमीसमेअं करेह कणवीरअं गन्धं ॥१६७॥

एकश्चलस्य द्वौ कुवलयस्य चत्वारः फलिनीकुसुमानाम् ।
मिसिस्तोकमिश्रमेतं कुरुत [1]करवीरकं गन्धम् ॥

एतं करवीरकपुष्पामोदसम्वादात् [1]करवीराख्यं गन्धं साधयत । कीदृशम्— शतपुष्पायाः परिमितेनांशेन सहितम् । कथम्— सिल्हकस्यैको भागो द्वौ कुष्ठस्य चत्वारः[2] प्रियङ्गुपुष्पाणामिति ॥१६७॥

दो भाआ कुवलअस्स विउणपिअंगुम्मीसिआ ॥
मिसिपाअद्धद्धमीसचंचलभाअसणाहा ॥
एअं पिसिऊण जइ विरइज्जइ चुण्णअं ॥
ता पसरिअपरिमलं पि लहुइज्जइ कणवीरअं॥१६८॥

द्वौ भागौ कुवलयस्य द्विगुणप्रियङ्गून्मिश्रितौ ।
मिसिपादार्धार्धमिश्रचञ्चलभागसनाथौ ॥
एतत् पिष्ट्वा यदि विरच्यते चूर्णकं ।
तत् [3]प्रसृतपरिमलमपि लघूक्रियते करवीरकम् ॥

एतद् वक्ष्यमाणभागस्थिति द्रव्यवृन्दं पिष्ट्वा यदि चूर्णं सम्पाद्यते तत् तेन स्वामोदेन विकसितामोदमपि हयारिपुष्पमधरीक्रियते[4] । कीदृशं द्रव्यवृन्दम्— द्वावंशौ कुष्ठस्य, ततो द्विगुणया [5]भागचतुष्टयपरिमाणया श्यामया सहितौ, [6]शतपुष्पायाः पादस्यार्धार्धेन षोडशभागेन सहितस्य सिल्हकस्यैकेनांशेन युक्ताविति ॥१६८॥

चलचरणभाअसहिअंदलचन्दणसिग्गुमूलभाएहि ॥
कुणह जणहिअअदइअं केअइसमपरिमलं गन्धं ॥१६९॥

चलचरणभागसहितं दलचन्दनशिग्रुमूलभागैः ।
कुरुत जनहृदयदयितं केतकीसमपरिमलं गन्धम् ॥

इमं लोकमनोनन्दनं केतकीपुष्पसदृशामोदं गन्धं सम्पादयत । कीदृशम्— सिल्हकस्य चतुर्भागेन[7] संयुक्तं गन्धपत्रमलय[8]शोभाञ्जनमूलानां समैरंशैः सहेति ॥१६९॥

---

१ कणवीरकं (क)-ख. । २ अत्र 'चत्वारः' इत्यतः परं, प्रियंगून्मिश्रिता' विति परवर्त्तिगाथांशपर्यन्तो ग्रन्थस्त्रुटितः ख. पुस्तके । ३ प्रसूत-ख. । ४ मधरीकुरुते-ख. । ५ भागचतुष्टया-ख. । ६ शतपुष्पया-ख. । ७ चतुर्थभागेन(?) । ८ सोभाञ्जन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कमविउणसालिसिअमिरिअकन्दचन्दणमुणालभाएहि ॥
होइ जिआसेसपसूअपरिमलो केअईगन्धो ॥१७०॥

क्रमद्विगुणशालिसितमरिचकन्दचन्दनमृणालभागैः ।
भवति जिताशेषप्रसूनपरिमलः केतकीगन्धः ॥

अयं केतकीपुष्पसौरभसम्वादात् केतकीगन्धसंज्ञो गन्धः परिभूतसमस्तकुसुमामोदः सम्पाद्यते । कैः— उत्तरोत्तरद्विगुणया वृद्ध्या शालिजातकशिग्रुमूलमलयोशीराणां भागैरिति ॥१७०॥

सलिलेलाघणचन्दणकललसिवाचंचलेहि सरिसेहि ॥
केअइकुसुमसुअन्धो सिग्गुजडामीसिओ गन्धो ॥१७१॥

सलिलैलाघनचन्दनकललशिवाचञ्चलैः सदृशैः ।
केतकीकुसुमसुगन्धः शिग्रुजटामिश्रितो गन्धः ॥

अयं गन्धः केतकीपुष्पसुरभिः । कैः— बालकत्रुटिमुस्तमलयमांसीचेतकीसिल्हकैस्तुल्यांशैस्तुल्यांशेन [1]शोभाञ्जनमूलेन युक्त इति ॥१७१॥

एलामुणालकुवलअजलजलहरतेल्लभाअसंजुत्तं ॥
सिग्गुजडारसपिट्ठं गन्धमिणं केअइसरिच्छं ॥१७२॥

एलामृणालकुवलयजलजलधरतैलभागसंयुक्तम् ।
शिग्रुजटारसपिष्टं गन्धमिमं केतकीसदृक्षम् ॥

इमं केतकीतुल्यं गन्धं सम्पादयत । कीदृशम्— [2]त्रुटिरणविषागवालकमुस्तचलानां समैर्भागैः सहितं [3]शोभाञ्जनमूलरसेन वर्तितमिति ॥१७२॥

कमवड्ढिएहि जाई कमपरिहीणेहि मल्लिका होइ ॥
सरिसेहि पउरपसवा तअराउरुदलवराङ्गेहि ॥१७३॥

क्रमवर्धितैर्जातिः [4]क्रमपरिहीनैर्मल्लिका भवति ।
सदृशैः प्रचुरप्रसवा तगरागुरुदलवराङ्गैः ॥

कुटिललघुगन्धपत्रत्वग्भिरुत्तरोत्तरैकांशवृद्धैर्जातिः सुमनःपुष्पतुल्यामोदो गन्धः सम्पद्यते । एतैरुत्तरोत्तरैकांशापचितैर्मल्लिका [5]शीतभीरुसमाख्यं पुष्पं तत्समानो गन्धः सम्पद्यते । एतैरेव समांशैः प्रचुरप्रसवा नवमालिकाख्यपुष्पं तत्समानो गन्धः सम्पद्यते इति ॥१७३॥

— [6]इति गन्ध (गन्धोदक) विधिः

---

१ तत्तुल्यांशेन-ख. । २ त्रुटिरसवालक-ख. । ३ सौभाञ्जनमूलेन स्वरसेन-ख. । ४ क्रमपरिहारैः-ख. । ५ शीतवीर्द्यं पुष्पं-ख. । ६ इति गन्धप्रयोगविधिः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सर्वपुष्पाणां पुष्पान्तसौरभापादनार्थं सुगन्धाधिकारप्रयोगं तावदाह—

कण्टअकरञ्जफलगिरमूलरसुम्मीसिएण व जलेण ॥
धोआणं णिअगन्धो णासइ णीसेसकुसुमाण ॥१७४॥

कण्टककरञ्जफलगिरमूलरसोन्मिश्रितेन वा जलेन ।
धौतानां निजगन्धो नश्यति निःशेषकुसुमानाम् ॥

कण्टककरञ्जस्य [1]तिक्तपिच्छाख्यस्य फलानां यो गिरो मज्जा मूलं वा तयोरेकतरस्य निस्यन्देन भावितं यत् सलिलं तेन प्रक्षालितानां पुष्पाणां स्वामोदः सुतरां निवर्तते । पुष्पान्तरसौरभापादनं तु वक्ष्यतीति ॥१७४॥

विमलसिवाजलपक्खालिआण धूवो व कुसुमवासो व ॥
जोव्वेअ ताण दिज्जइ विहिणा सोव्वेअ संकमइ ॥१७५॥

विमल[2]शिवाजलप्रक्षालितानां धूपो वा[3]कुसुमवासो वा ।
य एव तेषां दीयते विधिना स एव सङ्क्रामति ॥

तेषां सर्वपुष्पाणामुक्तेन प्रकारेण सकृत्प्रक्षालितानां ततः[4]परिवाणानां पुनः स्वच्छेन हरीतकीचूर्णोन्मिश्रेण वारिणा धौतानां य एवोक्तेषु पुष्पेषु मध्याद्[5]धूपस्तदामोदसंक्रामणपर्याप्तेन विधानेन समर्प्यते पुष्पान्तराणां[6]सङ्करोधिवासो वा तथैव समर्प्यते स एव तेषां परिणमति । येन धूपेन येनपुपाधिवासेन वा [7]वासांस्यधिवास्यन्ते तदामोदाव्यवहितानि भवन्ति । निजगन्धस्तेषां मनागपि नोपलभ्यत इति ॥१७५॥

इअमांसलपरिमलतुलिअमालईपमुहकुसुमगन्धेहि ॥
गन्धेहि को नहिरिअइ विअद्धजणहिअअदइएहि ॥१७६॥

इति मांसलपरिमलतुलितमालतीप्रमुखकुसुमगन्धैः ।
गन्धैः को न ह्रियते विदग्धजनहृदयदयितैः ॥

इत्युक्तेन प्रकारेण जनितो यः सान्द्रः सौरभविशेषस्तेन स्पर्धितः सुमनःप्रभृतीनां पुष्पाणामधिवास्यपुष्पव्यतिरिक्तानामामोदो यैस्तादृशैरुक्तै[8]र्गन्धैः सुरभिद्रव्यविशेषात्मकैर्नागरलोकमनोवल्लभैः को [9]नामान्यो नावर्ज्यते । ※ गाथयाऽनया गन्धद्रव्याणामन्यपुष्पेष्वन्यपुष्पसौरभोत्पादनरूपा शक्तिः प्रतिपादितेति ॥१७६॥(१६६-ख.)

---

१ तिरिविच्छाख्यस्य (चिरविल्वाख्यस्य?)-ख. । २ शिलाजल-ख. । ३ कुसुमसुवासो वा-ख. । ४ परिमाणानां-ख. । ५ धूपस्तदामोदः-ख. । ६ सङ्क(रे)धिवासे वा-ख. । ७ वासस्यमधिवास्यन्ते-ख. । ८ गंन्धः-ख. । ९ भामान्ये-ख. । ※एषोंशस्तावदेतत्पूर्ववर्त्तिगाथाव्याख्यानेन संबद्धश्चेत् साधीयान् स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ प्रयोगान्तरसिद्ध्युपयोगिन्याः पिण्डहरिद्रायाः[1] शोधनप्रकारमाह—

खंडखंडाइकआ दसरत्तं तक्कसंठिआ रअणी ॥
सुज्झइ सुधोअपिट्ठा पच्छा गुलधूविआ बहुसो ॥१७७॥

खण्डखण्डीकृता दशरात्रं तक्रसंस्थिता रजनी ।
शुद्ध्यति सुधौतपिष्टा पश्चाद् गुडधूपिता बहुशः ॥

हरिद्रा एवं विशुद्धिं प्राप्नोति । कथं— प्रथमं दलशो विदारिता । ततो आसत्रिभागमात्रं गोरसमध्ये स्थापिता । तत उद्धृत्य प्रक्षालिता, सूक्ष्मचूर्णिता सत्यन्ते गुडेन बहुवारं दत्तधूपा । एवं शुद्धायाः प्रयोगमस्या वक्ष्यतीति ॥१७७॥

अथ रोचनिकाख्यस्य द्रव्यस्य प्रयोगान्तरोपयोगिनीं शुद्धिमाह—

घणधवलंसुअ[2]धोअकुसुंभविहिधुअणणिम्मला होइ ॥
रोअणिआ गन्धदलं तेल्लोल्ला दुद्धसंसिद्धा ॥१७८॥

घनधवलांशुकधौतकुसुम्भविधिधावननिर्मला भवति ।
रोचनिका गन्धदलं[3] तैलाद्र्रा दुग्धसंसिद्धा ॥

रोचनिका काम्पिल्यकम् । सा करिष्यमाणानां गन्धद्रव्याणां दलं सारः संस्कार्यशरीरमित्यर्थः । सा चैवं शुद्धा भवति । कथम्- संहत ? सन्हात(?) सितवस्त्रपूतस्य कुसुम्भस्य पद्मकस्य यो विधिस्तेनैव विधिना यत् प्रक्षालनं तेन । निर्मला सम्पद्यते । ततस्तैलेनार्द्रीकृता, ततः क्षीरमध्ये कर्पटाभ्यन्तरे निक्षिप्य तद्रसस्नेहसंक्रामणेन मृदुत्वमापन्ना सती शुद्धा भवति । सैवंविधा वक्ष्यमाणगन्धद्रव्यसंस्कारयोग्यतां प्राप्नोतीति ॥१७८॥

णह[4]पक्कतेल्लवट्टिअकुसुम्भचुण्णेण कुंकुमं होइ ॥
णहपंचमभाअसणाहसालिदसभाअसहिएण ॥१७९॥

नखपक्वतैलवर्तितकुसुम्भचूर्णेन कुङ्कुमं भवति ।
नखपञ्चमभागसनाथशालिदशभागसहितेन ॥

युक्त्या साधितं यत् तैलं तत्र सूक्ष्मचूर्णितं यत् कुसुम्भचूर्णं चूर्णीकृतवकपद्मकं ? तेन काश्मीरकं सम्पद्यते । तदेव तद्भावं प्राप्नोतीत्यर्थः । कीदृशेन— नखस्य स्वापेक्षया पंचमेन भागेन संयुक्तं सत् तथैव शालिजातकस्य दशमेनांशेन युक्तं तेन । वर्णगौरभाभ्यां[5] कुङ्कुमतुल्यत्वात् कुसुम्भचूर्णमेवानया युक्त्या समालम्भनाद्युपयोगिकुङ्कुमपङ्कत्वमापद्यत इति ॥१७९॥

---

१ शोधनप्रकार ख. । २ काणिअ-ख. । ३ तैलार्द्र-ख. । ४ पिक्क-ख. । ५ कुंकुमतुल्यत्वं-. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करिकररुहपूइमुरापिसल्लितुल्ला करेइ रोअणिआ ॥
कुंकुमकज्जं लडहंगणाण लक्खारसुम्मीसा ॥१८०॥

करिकररुहपूतिमुरापिसल्लीतुल्या करोति रोचनिका ।
कुङ्कुमकार्यं लटहांगनानां लाक्षारसोन्मिश्रा ॥

रोचनिका प्रागुक्तेन क्रमेण शोधितं सत् काम्पिल्यकं काश्मीररूपयोजनं सम्पादयति । कीदृशी सती— नागकेशरनखगन्धमार्जारगन्धमुरामांसीनां समांशानां तुल्यपरिमाणा । यावत्परिमाणानि मांस्यन्तानि द्रव्याणि तावत्परिमाणा रोचनिकेत्यर्थः । तथा लाक्षाया द्रुमव्याधे रसेन भाविता । इत्थं वर्णामोदाभ्यां कुङ्कुमसादृश्यमापन्ना समालम्भनादि कुङ्कुमकार्यं करोतीति ॥१८०॥

मासदिसावसुरसवेअजलणसरिसेहि किमिरसोल्लेहि ॥
वोलणिसाणहचन्दणकुसुम्भहिङ्गुलुअभाएहि ॥१८१॥
पिट्ठेहि मालईकुसुमवाससुरहिअकअं सवीअंसं ॥
सेवेह गन्धमिमिणं लहुइअघणघुसिणमाहम्मं ॥१८२॥

मासदिग्वसुरसवेदज्वलनसदृशैः क्रिमिरसार्द्रैः ।
वोलनिशानखचन्दनकुसुम्भहिङ्गुलुकभागैः ॥
पिष्टैर्मालतीकुसुमवाससुरभीकृतं सबीजांशम् ।
सेवध्वं गन्धमिमं [1]लघूकृतघनकुङ्कुममाहात्म्यम् ॥

इमं गन्धं भजध्वम् । कीदृशम्— अधरीकृतसान्द्रकाश्मीरकप्रभावम् । वर्णसौरभसम्वादादुत्कृष्टकुङ्कुमतुल्यमित्यर्थः । कैर्द्रव्यैः साधितम्— रस[2]रजनीशुक्तिमलयजपद्मक[3]दरदानामंशैः । किंपरिमाणैः- मासादिसंख्यासमानैः । तेन वोलस्य द्वादशांशा मासतुल्याः । निशाया दश दिक्तुल्याः । नखस्याष्टौ वसुतुल्याः । चन्दनस्य षड् रसतुल्याः । कुसुम्भस्य चत्वारो वेदतुल्याः । हिङ्गुलुकस्य त्रयोऽग्नितुल्याः । इत्येवंपरिमाणैर्भागैः सर्वैः सह पिष्टैः, पश्चात् क्रिमिरसेनालक्तकेनार्द्रीकृतैः । कीदृशं गन्धम्— सुमनःपुष्पाधिवास सुगन्धीकृतं तथा बीजस्य प्रकृतिभूतस्य कुङ्कुमस्यांशेनैकेन भागेन सहितमिति । युगलकम् ॥१८१-१८२॥

कुट्ठकुसुम्भअमालाणहणिम्ब[4]खइरहिङ्गुलुणिसाहि ॥
सरिसाहि कुणह गन्धं तुलिउब्भडकुंकुमं सिसिरे॥१८३॥

कुष्ठकुसुम्भकमालानखनिम्बखदिरहिङ्गुलुनिशाभिः ।
सदृशीभिः कुरुत गन्धं तुलितोद्भटकुङ्कुमं शिशिरे ॥

---

१ लघुकृतकुङ्कुममोदात्म्यम् -ख. । २ रजनि-ख. । ३ दरदानां समांशैः-ख. । ४ खपुर-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धमिमं स्पर्धितोद्दामकाश्मीरकमत एव शिशिरकालोपयोग्यं सम्पादयत। कैर्द्रव्यैः-वाप्यपद्मकस्पृक्काशुक्तिपिचुमन्दनिर्यासदरदशोधितहरिद्राभिस्तुल्यांशाभिरिति ॥१८३॥

टंकणकललोहणहचन्दणसालिसमाणभाअं ॥
भाअद्धद्धतुलिअरसदेवीणिसाहिरिवेरमीसिअं ॥२८४॥
पंचउणंसमिलितकम्पिल्लअमत्थिरणहिक्खुधूविअं ॥
गन्धमिणमं कुणह घणघुसिणसमुज्जलचारुवण्णअं ॥१८५॥

टंकणकललोहनखचन्दनशालिसमानभागकम् ।
भागार्धार्धतुलितरसदेवीनिशाह्रीवेरमिश्रितम् ॥
पंचगुणांशमिलितकाम्पिल्यकमस्थिरनखेक्षुधूपितम् ।
गन्धमिमं कुरुत घनकुङ्कुमसमुज्ज्वलचारुवर्णकम् ॥

इमं [1]गन्धं सान्द्रारुणलोहितरमणीयच्छायं साधयत। कीदृशम्- समानानि तुल्यांशानि सुवर्णपाचिकाजटिलागुरुकरजमलयशालिजातकानि यस्मिन्तम्, तथा भागार्धार्धेन प्रत्येकं-चतु(र्थ)भागेन तुलितैर्बोलस्पृक्कारजनीवालकैः सहितम्। तथा पञ्चभिर्भागैः सहिता रोचनिका यस्मिन् तम्। तथा सिल्हककररुहगुडतृणैः समांशैर्दत्तधूपमिति ॥युगलकम्॥

सालिरससिप्पिमालामलअसमं कललरइअविउणंसं ॥
पंचउणसेलसलिलं कच्चूरअचउग्गुणुम्मीसं ॥१८६॥
वसुसमसामासहिअं मालइकअवासमिन्दुमअविद्धं ॥
गिह्मम्मि कुणह गन्धं मेलिअमुहरालिणिउरुम्बं ॥१८७॥

शालिरसशुक्तिमालामलयसमं कललरचितद्विगुणांशम् ।
पंचगुणशैलसलिलं कर्चूरकचतुर्गुणोन्मिश्रम् ॥
वसुसमश्यामासहितं मालतीकृतवासमिन्दुमदविद्धम् ।
ग्रीष्मे कुरुत गन्धं मेलितमुखरालिनिकुरुम्बम् ॥

इमं गन्धं शीतलत्वान्निदाघकाले साधयत। कीदृशम्— उत्कृष्टामोदत्वादाकृष्टकृतकलकल-मधुकरकुलम्। कीदृङ्मात्रम्— शालिजातकवोलनखस्पृक्काचन्दनानि तुल्यांशानि यस्मिन् तम्। तथा मांस्या सम्पादितौ द्विगुणांशौ द्वौ भागौ यस्मिन् तम्, तथा पञ्चगुणे प्रत्येकं भागपञ्चकपरिमाणे शिलापुष्पवालके यस्मिन् तम्। तथा [2]कयलेन चतुर्गुणेन सहितम्। तथा वसुसमया भागाष्टकपरिमाणया फलिन्या युक्तं। सुमनःपुष्पैर्दत्ताधिवासम्। तथा वेधमात्रया कर्पूरकस्तूरिकाभ्यां कृतवेधमिति ॥युगलकम् ॥१८६—१८७॥

[1] गन्धमार्द्रारुण—ख. । [2] कमलेन-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]ओहंसणिहट्टमलअवीसउणंससणाहआ ॥
दो भाआ कुंकुमस्स मज्जारद्धुम्मीसआ ॥१८८॥
गिरितिहलाभाअआविवाणाणलकअसंखा ॥
गन्धे रइवल्लहम्मि मालइमअससिविद्धए ॥१८९॥

उद्घर्षणनिघृष्टमलयत्रिंशतिगुणांशसनाथौ ।
द्वौ भागौ कुङ्कुमस्य मार्जाराधोंन्मिश्रौ ॥
गिरित्रिफलाभागावपि[2] बाणानलकृतसंख्यौ ।
गन्धे रतिवल्लभे मालतीमृगशशिविद्धे ॥

अस्मिन् रतिवल्लभाख्ये गन्धे सुमनःपुष्पकृताधिवासे मृगमदकर्पूरकृतवेधे [3]चैवं द्रव्यमात्रा । कथम्— परुषशिलातलकृतत्रिघर्ष(ण)स्य चन्दनस्य विंशतिगुणैर्भागैः सहितौ [4]द्वावंशावरुणस्य । शालिजातकस्य भागार्धेन संयुक्तौ । तथा शिलापुष्पस्य सुगन्धत्रिफलायाश्चाप्यंशौ यथाक्रमं बाणैः पञ्चभिरनलैस्त्रिभिश्च भागैर्विहितगणनौ । पञ्च गिरेर्भागास्त्रयश्च त्रिफलाया इति ॥१८८-८९॥

समकच्चूरकोसचलवाअसमट्ठउणंससिसिरअं ॥
बिउणणरिन्ददेवितुडिणहजलमुअहिसमानघुसिणअं ॥१९०॥
घुसिणचउग्गुणंसरणअमीसिअमणुकअजाइवासअं ॥
मअकप्पूरअविद्धमइसुन्दरं विरएह वण्णअं ॥१९१॥

समकर्चूरकोशचलवायसमष्टगुणांशशिशिरकम् ।
द्विगुणनरेन्द्रदेवीत्रुटिनखजलमुदधिसमानकुङ्कुमम् ॥
कुङ्कुमचतुर्गुणांशरणमिश्रितमनुकृतजातीवासम् ।
मदकर्पूरविद्धमतिसुन्दरं विरचयत वर्णकम् ॥

[5]इदमत्यन्तरमणीयं वर्णकं विलेपनद्रव्यं विधत्त । कीदृशम्— तुल्यांशानि कचलजातिपत्रिकासिल्हकागुरूणि [6]यस्मिन् तत्, तथाऽष्टभिर्भागैश्चन्दनं यस्मिन् तत्, तथा प्रत्येकं भागद्वयपरिमाणानि तगरस्पृक्कैलाशुक्तिबालकानि यस्मिन तत्, तथोदधिभिः समानं चतुर्भिर्भागैः स्थितं काश्मीरकं यस्मिन् तत्, तथा कुङ्कुमाच्चतुर्गुणेनोशीरेण मिश्रितम्, पश्चात् सुमनःपुष्पैर्दत्ताधिवासं वेधमात्रया च कस्तूरिकाघनसाराभ्यां कृतवेधमिति ॥१९०-१९१॥

---

१ तेहंस-ख. । २ भागार्द्ध-ख. । ३ चैव-ख. । ४ द्वौद्वा-ख. । ५ इमम्-ख. । ६ 'यस्मिँस्तत्' इति सर्वत्र ख. पुस्तके ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कअलेलारसलवंगणहक्कोलकोसआ ॥
ओहंसणिहट्टमलअवीसउणंसुम्मीसिआ ॥
चुण्णमिणं मअमिअंकविरइअमणहरवेहअं ॥
जोग्गं पुहइपईण मेलिअमहुअरणिवहअं ॥१६२॥

कयलैलारसलवङ्गनखक्कोलकोशाः ।
उद्घर्षनिघृष्टमलयविंशतिगुणांशोन्मिश्राः ॥
चूर्णमिदं मदमृगाङ्कविरचितमनोहरवेधम् ।
योग्यं पृथिवीपतीनां मेलितमधुकरनिवहम् ॥

इदमेवम्विधं सुगन्धिचूर्णम् । कीदृशम्— अतिसौरभादाकृष्टभ्रमरवृन्दम्, अत एव राज्ञामुचितम् । [1]कीदृङ्मात्रम्- कर्चूरत्रुटिवोलदेवकुसुमशुक्तिगोलकजातिपत्रिकाः समांशा यस्मिन् तत् । कीदृश्यः— [2]कृतशिलातलनिघर्षस्य चन्दनस्य [3]पूर्वभागापेक्षया विंशत्या भागैः सहिताः । कीदृशं चूर्णम्— कस्तूरिकाकर्पूराभ्यां सम्पादितः सुन्दरो वेधो यस्य तत् तथेति ॥१६२॥

विल्लकवित्थंकोल्लाण मूलमेक्कस्स मसिणविणिहट्टं ॥
चन्दणपाउम्मीसं कमधूविअवासिअं बहुशो ॥१६३॥
ससिकक्कोलअविद्धं गन्धाणिअमुहरमहुअरव्वातं ॥
कुणह विलेवणमिमिणं लहुइअहरिचन्दणामोअं ॥१६४॥

विल्वकपित्थाङ्कोल्लानां मूलमेकस्य मसृणविनिघृष्टम् ।
चन्दनपादोन्मिश्रं क्रमधूपितवासितं बहुशः ॥
शशिकक्कोलकविद्धं गन्धानीतमुखर[4]मधुकरव्रातम् ।
कुरुत विलेपनमिदं [5]लघूकृतहरिचन्दनामोदम् ॥

इदं [6]समालम्भनं सम्पादयत । कीदृशम्— अधरीकृतप्रकृष्टमलयजसौरभम् । अत एव सौरभाकृष्टध्वनदलिकुकम् । किंरूपम्- मालूरदधित्थेरिकिल्लानामेकतमस्य [7]सूक्ष्मपिष्टं मूलम् । कीदृशम्- मलयस्य [8]चतुर्थभागेन सहितं [9]तथोक्तानां [10]क्रमधूपानामेकतमेन धूपितं तथोत्कृष्टैः पुष्पैर्बहुवारं कृताधिवासं पश्चात् कर्पूरकक्कोलकाभ्यां कृतवेधमिति ॥युगलकम्॥

---

१ कीदृग्गात्रमित्यपि पाठः । २ शिलातलविघृष्टस्येति पाठान्तरम् । ३ पूर्वद्रव्यैकभागापेक्षयेति पाठान्तरम् । ४ मधुकरोद्घातम्-ख. । ५ लघुकृत-ख. । ६ मोदसमालम्भनं-ख. । ७ सूक्ष्मपिष्ट-ख. । ८ चतुर्भागेन-ख. । ९ यथोक्तानां ख. । १० क्रमधूपानामेकतमं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिअणिम्बदारुसुरतरुचन्दणपङ्के हि चन्दणं होइ ॥
वीसेक्करुद्दलोअणभाअविअप्पणामिलिएहि ॥१६५॥

सितनिम्बदारुसुरतरुचन्दनपङ्कैश्चन्दनं भवति ।
विंशत्येकरुद्रलोचनभाग[1]विकल्पनामिलितैः ॥

चन्दनमेतैर्भवति । कैः— श्वेतपिचुमन्दकाष्ठेन तथा देवदारुणा तथा [2]मलयजकर्दमेनैतैः । कीदृशैः— यथासंख्यं विंशत्या तथैकेन तथा रुद्रलोचनैस्त्रिभि[3]रित्येवमंशकल्पनया मिश्रितैरिति ॥१६५॥

कच्चूरमुराजलकललकंगुतिउणो कअम्बतरुपङ्को ॥
होइ गुडसिप्पिपक्कों विलेवणं वासिओ विहिणा ॥१६६॥

कर्चूरमुराजलकललकङ्गुत्रिगुणः कदम्बतरुपङ्कः ।
भवति गुडशुक्तिपक्को विलेपनं वासितो विधिना ॥

समालम्भनमिदं भवति । किन्द्रव्यम्— कदम्बवृक्षस्य वृत्तपुष्पस्य निघृष्टस्य सम्बन्धी कर्दमः । कीदृशः— कयलसुगन्धमुरावालकमांसीप्रियङ्गुभ्यः सर्वाभ्यस्त्रिगुणस्तथा गुडनखाभ्यां पक्वः प्रागुक्तयुक्त्या धूपदानेन परिशोषितः पश्चात् पूर्वोक्तविधानेन दत्तपुष्पाधिवास इति ॥१६६॥

मसिणविणिहट्टकंकअपंको दसभाअचन्दणुम्मीसो ॥
वण्णेण परिमलेण अ सुन्दरमलअच्छविं वहइ ॥१६७॥

मसृणविनिघृष्टकङ्कतपङ्को दशमभागचन्दनोन्मिश्रः ।
वर्णेन परिमलेन च सुन्दरमलयच्छविं वहति ॥

कङ्कतस्याऽशोकस्य निघृष्टस्य सतः सम्बन्धी कर्दमः सुभगस्य चन्दनस्य वर्णसौरभाभ्यां शोभां धारयति । कीदृशः सन्- दश(म)भागेन दशमेनांशेन मलयस्य सहित इति ॥१६७॥

कच्चूरसिवादाणवकुट्ठे हि समेहि मलअपडिरूबं ॥
गन्धं कणिआरपसूअतअरकुट्ठे हि वा कुणह ॥१६८॥

कर्चूरशिवादानवकुष्ठैः समैर्मलयप्रतिरूपम् ।
गन्धं कर्णिकार[4]प्रसूनतगरकुष्ठैर्वा कुरुत ॥

चन्दनप्रतिरूपं गन्धं संपादयत । कैः— कयलहरीतकीमुरावाप्यैः समांशैः । अथवा कर्णिकारस्यारग्वधस्य पुष्पैस्तथा कुटिलेन तथा कुष्ठेनैतैः समांशैरिति ॥१६८॥

---

१ विकल्पेन-ख. । २ मलयचन्दनेनैतैः-ख. । ३ इत्येकवमांशकल्पनया-ख. । ४ प्रसूततगरैः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विमलजलमसिणवट्टिअपरिणअमालूरखप्परअपङ्को ॥
चन्दणपाउम्मीसो चन्दनकरणिं समुव्वहइ ॥१९९॥

विमलजलमसृणवर्तितपरिणतमालूरकर्परपङ्कः ।
चन्दनपादोन्मिश्रश्चन्दनकरणिं समुद्वहति ॥

निर्मलजलेन सूक्ष्मपिष्टस्य पक्वस्य बिल्वकपाटस्य सम्बन्धी कर्दमो मलयजसादृश्यं धारयति । कीदृशः सन्- मलयजस्य चतुर्थेनांशेन संयुक्त इति ॥१९९॥

मलउब्भवचलकच्चूरकरिसलिलेहि सरिसभाएहि ॥
सेअसिवाकंजिअकढिअणिम्बच्छल्लीइ[1] विउणाइ[2] ॥
[3]मिसिभाअद्धुम्मीसाइ मसिणपिट्ठाइ[4] कुणह हेमन्ते ॥
गन्धं तुलिअगरुसोरहगोरवं तुहिणपडिपक्खं॥२००-२०१॥

मलयोद्भवचलकर्चूरकरिसलिलैः सदृशभागैः ।
श्वेतशिवा[5]काञ्जिकक्वथितविम्बच्छल्या द्विगुणया ॥
मिसिभागार्धोन्मिश्रया मसृणपिष्टया कुरुत हेमन्ते ।
गन्धं[6]तुलितागुरुसौरभगौरवं तुहिनप्रतिपक्षम् ॥

गन्धमिमं शीतकाले कुरुत । कीदृशम्— स्पर्धितलघुसौगन्ध्य[7]परिमाणं तथा शीतस्य प्रतियोगिनम् । केन द्रव्येण- चन्दनसिल्हककयलनागकेशरवालकैः समांशैस्तथा शुक्लहरीतकीसहितेन काञ्जिकेन क्वाथयुक्त्या क्वथितया पिचुमन्दत्वचा भागद्वयपरिमाणया तथा शतपुष्पाया भागार्धेन सहितया सूक्ष्मसंचूर्णितयेति ॥युगलकम्॥

कच्चूर[8]चारिचन्दणचलचिहुरसमं कुणह हेमन्ते ॥
बहुपाअद्धसणाहं लहुइअलहुपरिमलं गन्धं ॥२०२॥

कर्चूरचारिचन्दनचलचिकुरसमं कुरुत हेमन्ते ।
[9]बधूपादार्धसनाथं लघूकृतलघुपरिमलं[10] गन्धम्॥

इममपरं हेमन्त एव विनिर्जितागुरुसौरभं गन्धं साधयत । कीदृशम्—कयलस्थौणेयकमलयसिल्हकानि समांशानि यस्मिन् तं तथा बध्वाः स्पृक्कायाः पादार्धेनाष्टमांशेन सहितमिति ॥२०२॥

---

१ च्छल्लोहि-ख. । २ विउणाहि-ख. । ३ मिसिभाअद्धोम्मीसाइ-ख. ।४मसिणपिट्ठाहि-ख.। ५काञ्जिक-ख.।
६ तुलितागुरुगौरवं-ख. । ७ परिमाणंक. । ८ चार-ख. । ९ वधूपार्श्वसनाथं-ख. । १० सुगन्धं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोहिसकुसुमुम्मीसारणालतुलसीदलेहि सिद्धाइं ॥
गन्धदलाइं होन्ति सुसोसिआइं सिअमिरिअमूलाइं ॥२०३॥

रोहिषकुसुमोन्मिश्रारनालतुलसीदलैः सिद्धानि ।
गन्धदलानि भवन्ति सुशोषितानि सितमरिचमूलानि ॥

शिग्रुमूलानि [1]उक्तवक्ष्यमाणानां गन्धानां दलभूतानि भवन्ति। कीदृशानि-रोहिषस्य कत्तृणस्य पुष्पैः सहितं यत् काञ्जिकं तस्मिन् तुलसीदलैः [2]सुरसापत्रैः सह क्वाथयुक्त्या सम्पादितानि, तत उद्धृत्य [3]शोषितानि चूर्णीकृतानीत्यर्थः ॥२०३॥

[4]सकढिणकइत्थवक्कलतंडुलओ पंचवक्कलोक्कढिओ ॥
कअचुण्णो गुच्छासवमहुमालावोलसम्वलिओ ॥२०४॥
सिण्णो पिट्ठोपि पुणोवि णाराअधूविओ बहुसो ॥
कापित्थजोअजोग्गो जाअइ कअमल्लिआवासो ॥२०५॥

[5]सकठिनकपित्थवल्कलतण्डुलः पञ्चवल्कलोत्क्वथितः ।
कृतचूर्णो गुच्छासवमधुमालाबोलसम्बलितः ॥
स्विन्नः पिष्टोऽपि पुनःपुनरपि नाराचधूपितो बहुशः ।
कापित्थयोगयोग्यो जायते कृतमल्लिकावासः ॥

सुक्वथितकर्कशस्य कपित्थस्य वल्कलैरन्तवर्तिनीभिस्त्वग्भिः [6]सहितस्तण्डुलः [7]कृमिसमुद्भवः कपित्थनिर्वर्त्यगन्धयोगोचितो भवति । कीदृशः सन्- पञ्चभिः [8]कपित्थाम्रजम्बीरबीजपूरबिल्वानां सम्बन्धिनीभिस्त्वग्भिः क्वाथयुक्त्या जलेन [9]क्वथितस्ततः उद्धृत्य सूक्ष्मपिष्टः सन् पूर्वोक्तधूपनयुक्त्या नाराचधूपेन चन्दनादियोगाव्यवहितेन[10] धूपितस्ततो गुच्छेन स्थौणेयकेन तथा वक्ष्यमाणेन येन केन चित् सुरादिना (SS सवेन) तथा माक्षिकस्पृक्कारसैः संयुक्तः सन् कर्पटाभ्यन्तरनिहितः। पुनः पञ्चवल्कलक्वाथजलेन दत्तस्वेदस्ततः पुनः सूक्ष्मपिष्टस्ततः पुनरपि पूर्ववन्नाराचधूपेन बहुवारं धूपितः, पश्चान्मल्लिकापुष्पैः कृताधिवास इति ॥युगलकम्॥ २०४-२०५॥

अरणिच्छल्लिकुचन्दणपदुमअकालेअआणमेकेक्कं ॥
होइ विलेवणजोग्गं कअपरिअम्मं विहाणेण ॥२०६॥

अरणिच्छल्लीकुचन्दनपद्मक[11]कालेयकानामेकैकम् ।
भवति विलेपनयोग्यं कृतपरिकर्म विधानेन ॥

१ उक्तानां वक्ष्यमाणानां चेति । २ सुरस-ख. । ३ शोषितचूर्णीकृतानीत्यर्थः-ख । (शुष्कीकृत्य चूर्णितानीति) । ४ सुकढिण-ख. । ५ सुक्ठिन-ख. । ६ सह तण्डुलः बीजसमूहः-ख. । ७ लाचेति यावत् । ८ कपित्थाम्रनम्बू ? । ९ क्वथित(:) समु(सन्नु)द्धृत्य-ख. । १० योगयव्यवहितेन-ख. । ११ कालीयकानाम्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अरणिच्चल्ली अग्निमन्थत्वक् तथा कुचन्दनं रक्तचन्दनं तथा पद्मकं ... तथा कालीयकः पीतसारम् , एतेषामन्यतमं पूर्वोक्तचन्दन(ा दि)कृतसंस्कारक्रमेण सम्पादितपरिकर्म सत् समालम्भनोचितचन्दनादिरूपं सम्पद्यत इति ॥२०६॥

काविर्त्थी घणचन्दणमुणालकरिकामिणीहि सरिसाहि ॥
तुडिसालिसेलपाएहि [1]मेलिआ होइ सुसुअन्धा ॥२०७॥

कापित्थी घनचन्दनमृणालकरिकामिनीभिः ।
त्रुटिशालिशैलपादैर्मेलिता भवति सुसुगन्धिः (?) ॥

कापित्थी उक्तक्रमेण साधितं कपित्थचूर्णम् । सा सुष्ठु श्रेष्ठामोदा भवति । कीदृशी-एतैर्मिश्रिता । कैः— मुस्तमलयोशीरनागकेशरप्रियङ्गुभिस्तुल्यांशाभिस्तथैलाशालिजातक-शिलापुष्पाणां प्रत्येकं [2]चरणेन चतुर्थांशेनेति ॥२०७॥

समतुलिअमुणालतेल्लमलअमुराकुट्ठंसा ॥
तुडिपाअसणाहसालिभाअद्धुब्भडगन्धा ॥
दसउणकाविर्त्थीभाअमेलिआ कअधूवा ॥
विद्धा मअचन्देहि होन्ति विलेवणजोग्गा ॥२०८॥

समतुलितमृणालतैलमलयमुराकुष्ठांशाः ।
त्रुटिपादसनाथशालिभागार्धोद्भटगन्धाः ॥
दशगुणकापित्थीभागमेलिता कृतधूपाः ।
विद्धा मदचन्द्राभ्यां भवन्ति विलेपनयोग्याः ॥

तुल्यधृता उशीरसिह्लकचन्दनसुगन्धमुराबाप्यानां भागाः समालम्भनोचिताः सम्पद्यन्ते । कीदृशाः सन्तः— एलानां चतुर्थेनांशेन संयुक्तस्य शालिजातकस्यार्धभागेनोद्दामसौरभा, दशगुणैः शोधितकपित्थचूर्णांशैर्मिश्रितास्ततः केनचिद् धूपेन धूपिताः, पश्चात् कस्तूरिका-कर्पूराभ्यां वेधमात्रया कृतवेधा इति ॥२०८॥

—इति गन्धविधिः

सालिमुरासेलरसेहि सरदिसातिहिमिअंकसरिसेहि ॥
गुडससिणहाइधूएहि केअईवासिओ दप्पो ॥२०९॥

शालिमुराशैलरसैः [3]शरदिक्तिथिमृगाङ्कसदृशैः ।
गुडशशिनखादिधूपैः केतकीवासितो दर्पः ॥

---

१ सहिआ-ख. । २ चतुर्थेन-ख. । ३ रसदिक्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतैर्द्रव्यै[1]र्दर्पः कस्तूरिका सम्पद्यते। कैः- शालिजातकसुगन्धमुराशिलापुष्पवोलैर्यथाक्रमं शरादिसदृशैः। तेन शरैः पञ्चभिर्भागैः शालिजातकम्, दिग्भिर्दशभिर्मुरा, तिथिभिः पञ्चदशभिः शैलेयकम्, मृगाङ्केनैकेन भागेन रस इत्येवंविधांशैः। कीदृशैः- गुडसर्जरसशुक्त्यादिभिः पूर्वोक्तैरेव द्रव्यै[2]र्धूपो धूपनं येषां तैः। कीदृशो दर्पः- केतकीपुष्पैः कृताधिवासः। उक्तभागक्रमेणैतानि द्रव्याणि मिश्रितानि धूपितानि केतक्याधिवासितानि सन्ति कस्तूरिकामोदतुल्यामोदानि भवन्तीति ॥२०६॥

मअदप्पमिअंकाउरुकविहि विउणीकएहि परिपाडीइ ॥
हिङ्गुलुअमलअभाएहि गअणचन्दप्पमाणेहि ॥
पसुपइजलेण पिट्ठा पक्का लुंगाइअम्मि पुडविहिणा ॥
केअइपसूअवासेण मणहरा होइ मअणाही ॥२१०-११॥

मृगदर्पमृगाङ्कागुरुकपिभिर्द्विगुणीकृतैः [3]परिपाट्या ।
हिङ्गुलुकमलयभागाभ्यां गगनचन्द्रप्रमाणाभ्याम् ॥
पशुपतिजलेन पिष्टा पक्वा लुङ्गादिके पुटविधिना ।
केतकीप्रसूनवासेन मनोहरा भवति मृगनाभिः ॥

एवं प्रयुक्तेन [4]केतकीपुष्पाधिवासनेन हृद्या कस्तूरिका सम्पद्यते। कथम्— एतैर्द्रव्यैर्निर्मितशरीरा सती छागमूत्रेण वर्तिता। ततः पूर्वोक्तेन पुटपाकविधिना लुङ्गादिके मातुलुङ्गादौ, आदिग्रहणान्नारङ्गजम्बीरयोः पूर्ववत् पक्वा। कैर्द्रव्यैः— कस्तूरिकाकर्पूरलोहसिह्लकैः परिपाट्या उत्तरोत्तरक्रमेण द्विगुणितैस्तथा [5]दरदचन्दनयोः प्रत्येकमेकेनैकेन भागेन गगनचन्द्रशब्दाभ्यामुक्तेनेति ॥युगलकम्॥२१०-११॥

—इति कस्तूरिकाकृतिः

आसवजोएण विणा ण होन्ति गन्धा विअड्ढजणदइआ ॥
आसवपरिअम्ममिणं संपइ भणिमो समासेण ॥२१२॥

आसवयोगेन विना न भवन्ति गन्धा विदग्धजनदयिताः ।
आसवपरिकर्मेदं संप्रति भणामः समासेन ॥

प्रस्तुतानामासवानामुक्तगन्धसंस्कारकत्वा[6]दासवसंस्करणीयत्वप्रतिपादनार्था स्पष्टैषा गाथेति ॥२१२॥

---

१ र्मदः-ख. । २ धूपिता कस्तूरिकामोदः-ख. । ३ पाट्या—ख. । ४ केतकीपुष्पाधिवासितेन-ख. ।
५ दरदचन्द्रयोः-ख. । ६ दासवस्य करणीयत्व-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुट्ठसरोरुहकेंसरविल्लज्जुणकुसुमचुण्णकअगब्भं ॥
महु [1]ससिआसुरहिजलं जउसारिअसारिआपत्ते ॥
अअणद्धं गोट्ठट्ठिअमिणमो फंसेण तणदलाणं वि ॥
कुणइ मअदप्पगन्धं किं पुण जुत्तीविसेसाण ॥२१३-१४॥

कुष्ठसरोरुहकेशरविल्वार्जुनकुसुमचूर्णकृतगर्भम् ।
मधु [2]ससितासुरभिजलं जतुसारितसारिकापात्रे ॥
अयनार्धं गोष्ठस्थितमेतत् स्पर्शेन तृणदलानामपि ।
करोति मृगदर्पगन्धं किं पुनर्युक्तिविशेषाणाम् ॥

इदं द्रव्यं कस्तूरिकामोदं स्पर्शेण निर्वर्तयति । कस्य– तृणपत्राणामपि किंपुनरुक्तादीनां [3]योगान्तराणामिति । कीदृशम् – मृद्भाण्डस्थापितं सन्मासत्रयमात्रं गोष्ठस्थितं, गोष्ठं गवां निवासस्थानं तत्र स्थितम् । किं तद् [4]द्रव्यं यदेवं करोति– माक्षिकम् । कीदृशम्– वाप्यपद्मकिञ्जल्कमालूरककुभपुष्पाणां चूर्णेन कृतगर्भम् । गर्भे तानि [5]विन्यस्येत्यर्थः । अन्यच्च कीदृशं [6]मधु— सह सितशर्करया गोमूत्रेण च वर्तते इति तथाविधम् । काधारे कृतगर्भम्— जतुना द्रावितेन विलिप्तं यन्मृद्भाजनं तस्मिन् । अत्र मात्रा— कुष्ठादीनि चत्वारि समांशानि, सर्वाणि यावत्परिमाणानि [7]ततोऽष्टगुणं मधु, मधुसमं गोमूत्रम्, कुष्ठादीनां च सर्वेषां तुल्या शर्करेति । सर्वं चैतज् जतुलिप्तमृद्भाण्डावस्थितं मासत्रयमात्रात् कस्तूरिकासौरभजनक आसवः सम्पद्यते इत्यर्थः । सर्वासवानामनुक्तविशेषाणामयमेव मात्राक्रम इति ॥युगलकम्॥२१३-१४॥

पल्लव[8]कढिअवारिसमभाअमीसिओ पङ्कओ ॥
केअइणवपसूअदलखंडविमीसिओ णिहिअओ ॥
सोहंजणअसलिलदणुआहिवसलिलविलित्तओ ॥
णिम्मलभाअणम्मि सत्ताहमिमो घणओअरट्ठिअओ ॥२१५॥
अइपसरन्तामोओ कुसुमरसो फंसएण गन्धाण ॥
कुणइ विणिज्जिअदप्पपरिमलं बहुमअं विअद्धाण ॥२१६॥

पल्लवक्वथितवारिसमभागमिश्रितः पङ्कः ।
केतकीनवप्रसूनदलखण्डविमिश्रितो निहितः ॥

---

१ सहिआ–ख. । २ सहिता–ख. । ३ योगान्तराणामपि–ख. । ४ द्रव्यमेवं–ख. । ५ यस्येत्यर्थः–ख. ।
६ मधुसहितशर्करायाः–ख. । ७ ततोष्टगुणं मधुसमं–ख. । ८ कढिअ–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शौभाञ्जनकसलिलदनुजाधिपसलिल(पेशि)विलिप्तः ।
निर्मलभाजने सप्ताहमयं धान्योदरस्थितः ॥
अतिप्रसरन्नामोदः कुसुमरसः स्पर्शेन गन्धानाम् ।
करोति विनिर्जित[1]दर्पपरिमलं बहुमतं विदग्धानाम् ॥

अयमतिशयप्रसरद्दर्पसौगन्ध्यः कुसुमरसो माक्षिकमुक्तानां गन्धानां सम्पर्कमात्रेणाभिभूतमृगमदामोदं सौरभ सम्पादयत्यतएव भुजङ्गलोकवल्लभः । कीदृशः सन् कुसुमरसः- पूर्वोक्तैः पञ्चभिः पल्लवैः क्वाथयुक्त्या कथितं यज्जलं तत्समेन भागेन सहितस्ततो विपक्वस्ततः केतकीप्रत्यग्रपुष्पसम्बन्धिभिः पत्रशकलै[2]र्मिश्रितः सन् निर्मले भाण्डे विनिक्षिप्तः । कीदृशः सन— शिग्रुमूलरसेन तथा सुगन्धमुरावालकमांसीभिः पिष्टाभिर्विलिप्तः । भाण्डस्य विलेपनात् स एव विलिप्त इत्युपचारादुक्तम् । ततः सप्तरात्रं धान्यराश्यन्तरवस्थितः । अयमस्य मध्वासवस्य साधनविधिः— पञ्चपल्लवक्वथितेन जलेन सह तुल्यं माक्षिकं पक्त्वा माक्षिकशेषं गृहीत्वा केतकीपुष्पपत्रखण्डैर्विमिश्रितशिग्रुमूलरसपिष्टाभिमुरावालकमांसीभिर्विलिप्ते भाण्डे विनिक्षिप्य सप्तरात्रं धान्यमध्ये स्थापनीयमिति ॥युगलकम्॥(तिलकम् ?)॥२१५-१६॥(२१५-१७?)॥

भाओ भाओ सुरतरुगुलाण सोलह सिग्गुदुमसलिलस्स ॥
रविपक्कं तिहलाविद्धमासवं कुणह सुसुअन्धं ॥२१७॥

भागो भागः सुरतरुगुडयोः षोडश शिग्रुद्रुमसलिलस्य ।
रविपकं त्रिफलाविद्धमासवं कुरुत सुसुगन्धिम् ॥

इममासवं सुष्ठुस्वामोदं साधयत । कीदृशम्— सुगन्धित्रिफलाकृतवेधम् । कीदृग्रूपम्— देवदारुगुडयोः समावंशौ, शौभाञ्जनमूलरसस्य षोडश भागा इत्येतन्मिश्रीकृत्य [3]पक्वमात्रं सूर्यातपेन पक्वमिति ॥

समहिंगुतुडितमालतअतअरुप्पलचुण्णओ ॥
णिम्मलगुलमीससिग्गुमूलरसणिहित्तओ ॥
मलिओ सुहमडुके चुण्णिअजव(थोह)संजुत्तओ ॥
जाअइ खणमत्तएण आसवो सुसुगन्धओ ॥२१८॥

समहिङ्गुत्रुटितमालत्वचतगरोत्पलचूर्णः ।
निर्मलगुडमिश्रशिग्रुमूलरसनिहितः ॥

१ दर्पपरिमलकं-ख. । २ निर्मितः-ख. ३ पक्वमात्रं-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मलितः शुभमद्गुके चूर्णितयव(स्तोक)संयुक्तः ।
जायते क्षणमात्रेणासवः सुसुगन्धिः ॥

आसवानां [1]द्विविधा सिद्धिः— कालानुसारभाविनी सद्योभाविनी च । तत्रायमासवः क्षणमात्रकेण सद्यएव सम्पद्यते । कीदृशः— सुतरामुत्कृष्टामोदः । कः पदार्थ आसवः सम्पद्यते— तुल्यांशानां दरदैलागन्धपत्रासारकुटिलकुष्टानां चूर्णः । कीदृशः-शोधितेन गुडेन सहिते शौभाञ्जनमूलनिस्यन्दे निक्षिप्तस्ततो निर्मलमृत्पात्रे मृदितस्ततो यवचूर्णस्तोकेन मिश्रितः । अत्र मात्रा पूर्ववत् । यवचूर्णं तु गुडतुल्यमिति ॥युगलकम्॥२१८॥

समतुलिअसुरारिवारिमलउब्भवमज्जारआ ॥
गुरुघुसिणपिसल्लितेल्लमीसिआ कअचुण्णआ ॥
जाइफलट्ठमभाअवासिआ णिक्खित्तआ ॥
सगुले सिग्गुरसम्मि सज्जो आसवणिम्माअआ ॥२१९॥

समतुलितसुरारिवारिमलयोद्भवमार्जाराः ।
गुरुकुङ्कुमपिसल्लीतैलमिश्रिताः कृतचूर्णाः ॥
जातीफलाष्टमभागवासिता निक्षिप्ताः ।
सगुडे शिग्रुरसे सद्य आसवनिर्मायकाः ॥

एते तात्कालिकस्यासवस्य सम्पादकाः । के- समांशा गन्धमुरावालकचन्दनपूतिकेशाः । कीदृशाः— लोहारुणमांसीसिह्लकैः समांशैः सहिताः [2]श्लक्ष्णपिष्टास्ततो मालतीफलस्याष्टमेनांशेन जनितामोदाः सन्तः शोधितगुडसहिते शौभाञ्जनमूलनिस्यन्दे न्यस्ताः । मात्रा पूर्ववदिति ॥२१९॥

समतुलिअसालसल्लइसुरतरुगुरुमच्छण्डिआहि समहुहि ॥
धूवो गन्धासवभाअणाण भणिओ विअड्ढेहि ॥२२०॥

समतुलितसालसल्लकीसुरतरुगुरुमत्स्यण्डिकाभिः समधुभिः ।
धूपो गन्धासवभाजनानां भणितो विदग्धैः ॥

अयं धूप उक्तानां गन्धार्थानामासवानां यानि स्थापनभाण्डानि तेषामधिवासनार्थाय व्युत्पन्नैरभिहितः । कैर्द्रव्यैः— तुल्यपरिमाणाभिः सर्जरसकुन्दुरुकीदेवदारुलघुशर्कराभिर्माक्षिकेन भाविताभिरिति ॥२२०॥

तह वासो कमवड्ढिअकक्कोलअमिरिअमालइफलेहि ॥
णिद्दिट्ठो ताणंविअ मअलंछणपाअसहिएहि ॥२२१॥

---

१ विविधा-ख. । २ सन्तः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा वासः क्रमवर्धितकक्कोलकमरिचमालतीफलैः ।
निर्दिष्टस्तेषामेव मृगलाञ्छनपादसहितैः ॥

तेषामेवोक्तानां भाण्डानामयं वासः संस्कारविशेष उक्तः। कैर्द्रव्यैः- उत्तरोत्तरैकांशातिरिक्तैः [1]कोलतीक्ष्णजातीफलैः । कीदृशैः- कर्पूरस्य पूर्वद्रव्याणामेकतमाच्चतुर्थेनांशेन मिश्रितैरिति ॥२२१॥

—आसवविधिः

अच्चन्तणिम्मलीकअखण्डिअपरिभज्जिओ विहाणेण ॥
उण्हो च्चिअ सिद्धत्थअतेल्लद्दरतुप्पिअणिव्वविओ ॥
कप्पूरतेल्लसित्तो असारफलकोललवलिचुण्णेहि ॥
पिप्पलिचुण्णुम्मीसेहि भाविओ भुज्जविणिबद्धो ॥
सिअसिचअ[2]गाहवलिओ सत्ताहं धण्णरासिविणिहित्तो ॥
घणसारपाअसहिओ पुणोवि धण्णोअरे णिहिओ ॥
इअ[3]एवं[4]परिअम्मोव्व सो विअम्भन्तमंसलामोओ ॥
होइ अरण्टुओ च्चिअ चारुकप्पूरपडिरूवो ॥२२२–२२५॥

अत्यन्तनिर्मलीकृतखण्डितपरिभर्जितो विधानेन ।
उष्ण एव सिद्धार्थकतैलदराभ्यक्तनिर्वापितः ॥
कर्पूरतैलसिक्तोऽसारफलकोललवलीचूर्णैः ।
पिप्पलीचूर्णोन्मिश्रैर्भावितो भूर्जविनिबद्धः ॥
सितवस्त्र[4]गाढवलितः सप्ताहं धान्यराशिविनिक्षिप्तः ।
घनसारपादसहितः पुनरपि धान्योदरे निहितः ॥
[6]इत्येवंपरिकर्म्मैत्र स विजृम्भमाणमांसलामोदः ।
[7]भवत्यरनष्टक एव चारुकर्पूरप्रतिरूपः ॥

कर्पूरकृतिरियम् । अरणट्टको निष्पर्यायो लाटादिदेशप्रसिद्धः पार्थिवो द्रव्यविशेषो दन्तमार्जनोपयोगी अभ्रकप्रायच्छाय[8]स्तद्वद्दलशोविदारणयोग्यो यः स एव कर्पूरः सम्पद्यते। कीदृशः सन्— प्रथमं तावदतिशयेन शोधितस्ततो दलशःकृतस्ततः [9]कर्परादौ दाहसंर-

१ कोमल–ख. । २ वारहवलिअ–ख. । ३ एवविह–ख. । ४ परिअम्मोविअ–ख. । ५ वाढवेष्टितः–ख. ।
६ इत्येव बिध–ख. । ७ भवत्यवनट्टक–ख. । ८ स्तद्वद्दलसौविद्दारयोग्यो–ख. । ९ कर्पूरादौ–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लघरूपेण विधिना तापितस्ततः सोष्मैव सर्षपतैलेन मनागभ्यक्तः सन् निर्वापितः शीतलीकृतस्ततः कर्पूरतैलार्द्रीकृतस्ततस्त्वचजातीफलवकोलद लताकस्तूरिका पिप्पलीनां समांशानां चूर्णैरवचूर्णितः सन् भूर्जपुटके [1]निधायावगुण्ठितस्ततस्तस्योपरि शुक्लवस्त्रेण निर्विवरं कृत्वा वेष्टितः सन् [2]सप्ताहोरात्रं धान्यराशिमध्ये स्थापितस्ततस्तस्मान्निष्कृष्य स्वानेच्छया कर्पूरस्य चतुर्थेनांशेन युक्तः सन् पुनरपि पूर्वयुक्त्यैव धान्यराशौ सप्तरात्रमेव स्थापितः । इत्थं यथोक्तेन परिकर्मणा संस्कारविधिना प्रसरत्सान्द्रसौरभ उक्तो द्रव्यविशेष एव श्रेष्ठकर्पूरतामापद्यत इति ॥चतुर्भिः कुलकम्॥२२२-२२५॥

पक्खालिअणिच्छल्लिअचुण्णिअलहुसिग्गुकन्दरसकुडओ ॥
कक्कोलकपलससिकरिसचुण्णसंजोइओ वहलो ॥
णिग्गन्धविमल[3]रूप्पाइमसिण[4]पत्तोअरम्मि परिवाणो ॥
ससिरूवरइअखण्डो ससिविद्धो होइ कप्पूरो॥२२६-२२७॥

प्रक्षालितनिश्छल्लीकृतचूर्णितलघुशिग्रुकन्दरसकुडवः ।
कक्कोल[5]कपलशशिकर्ष[6]चूर्णसंयोजितो वहलः ॥
निर्गन्धविमल[7]रूप्यादिमसृणपात्रोदरे परिवाणः ।
शशिरूपरचितखण्डः शशिविद्धो भवति कर्पूरः ॥

एष कर्पूरः सम्पद्यते । को द्रव्यविशेषः— [8]सुधौतस्यापासितत्वचस्ततः क्षुण्णस्य स्वल्पस्य शौभाञ्जनमूलस्य यो निस्यन्दस्तस्य पलाष्टकपरिमाणो भागः । कीदृशः— कक्कोलकचूर्णस्य प्रकुञ्चेन तथा कर्पूरचूर्णस्य पाणितलेन मिश्रितः सन्धानीकृतस्ततो विरुद्धद्रव्यान्तरगन्धरहितस्य प्रक्षालितस्य रजतादेः सौवर्णोष्मणप्रायस्य [9]सुश्लक्ष्णस्य [10]पात्रस्याभ्यन्तरे परिवाणः, कठिनीभूतः सन् कर्पूरशकलाकाराणि निर्मितानि शकलानि यस्यैतादृशः कृतः पश्चादकृत्रिमकर्पूरेण कृतवेध इति ॥युगलकम्॥२२६-२७॥

ववगअकोसोच्छल्लिअविअपूरअमज्झविणिहिअविअक्को ॥
वाराइ तिण्णि सालो दसभाउम्मीसिओ चन्दो ॥२२८॥

व्यपगतकोशोद्वर्तितबीजपूरकमध्यविनिहितविपक्कः ।
वारांस्त्रीन् सालो दशभागोन्मिश्रितश्चन्द्रः ॥

सालः सर्जरस एव कर्पूरो भवति । कीदृशः सन्- अपनीतान्तर्वर्ति[11]कोशबीजादेस्ततः[12]परिवर्तितत्वचो मातुलुङ्गस्य गर्भे, पूर्वोक्तयुक्त्या नवे नवे मातुलुङ्गे, वारत्रयं

---

१ निधायावग्रथितः-ख. । २ सप्ताहोरात्रान्-ख. । ३ रूपाइ-ख. । ४ पत्तोअरविपरिमाणो-ख. । ५ कयल-ख. । ६ चूर्णस्य-ख. । ७ कम्पादि-ख. । ८ सुधौतस्य पालितत्वचसूतः-ख. । ९ सुसूक्ष्मस्य-ख. । १० पात्रस्याभ्यन्तरपरिमाणः ख. । ११ केशर-ख. । १२ ततो-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतपाकः सन् ततो [1]निष्कृष्याकृत्रिमस्य कर्पूरचूर्णस्य दशमेनांशेनावचूर्णनयुक्त्या मिश्रित इति ॥२२८॥

—कर्पूरकृतिः ॥

मउअग्गिकढन्तोज्जललक्खारससेइओ सुपरिवाणो ॥
पत्तङ्गअरत्तचन्दणमंजिट्ठाखइरसिग्गुहि ॥२२९॥
पक्कमहुथोअसरिसवतेल्लोल्लकरेहिमलिअविक्खिरिओ ॥
पउरजलधोअविमलो णिप्फीइअविरलणिक्खित्तो ॥२३०॥
कुंकुमजलघुसिणासवजणिउब्भडवण्णमंसलामोओ ॥
पअइत्थथोअकेसरसंबलिओ धूविओ कमसो ॥२३१॥
इअ कुमरिकुसुमकेसरणिवहो दसभाअवीअकअवेहो ॥
लहुइअघणघुसिणउणो करेइ दविणं विअद्धाण ॥२३२॥

मृद्वग्निक्वथदुज्ज्वललाक्षारसस्वेदितः सुपरिवाणः ।
पत्राङ्गकरक्तचन्दनमंजिष्ठाखदिरशिग्रुभिः ॥
पक्वमधुस्तोकसर्षपतैलार्द्रकराभ्यां मलितविकीर्णः ।
प्रचुरजलधौतविमलो निष्पीडितविरलनिक्षिप्तः ॥
कुङ्कुमजलकुङ्कुमासवजनितोद्भटवर्णमांसलामोदः ।
प्रकृतिस्थस्तोककेशरसंवलितो धूपितः क्रमशः ॥
इति कुमारीकुसुमकेशरनिवहो[2] दशभागबीजकृतवेधः ।
लघूकृतघनकुङ्कुमगुणः करोति द्रविणं विदग्धानाम् ॥

इत्यनेन क्रमेण हट्टकुमारीपुष्पकिञ्जल्कानां समूहोऽधरीकृतसान्द्रकुङ्कुमस्वभावो व्युत्पन्नानां धनसम्पत्तिं करोति । कथम्—प्रथमं तावदनुत्कटानलेन कथितो यो लोहितदीप्तिनिस्यन्दस्तस्मिन् दत्तस्वेदस्ततः उद्धृत्य सुष्ठु शोषितस्ततः पट्टरागकुचन्दनचित्रवल्लीरक्तसारशोभाञ्जनैः समांशैः पक्वेन माक्षिकेण तथा तदपेक्षयाल्पेन सिद्धार्थकतैलेनाभ्यक्ताभ्यां पाणिभ्यां मृदितः सन् विरलीकृतस्ततो बहुसलिलप्रक्षालितो निर्मलः सन् निष्पीडितस्ततः पूर्ववत् पृथक् पृथग् विकीर्णस्ततः काश्मीररञ्जितेन जलेन तथा वक्ष्यमाणेन कुङ्कुमासवेनोत्पादितोद्दामच्छाया सान्द्रं च सौरभं यस्य स तादृशः [3]सन्नविकृतैरन्यैः [4]परिमितैः काश्मीरकैर्मिश्रितस्ततो दत्तक्रमधूपोऽनन्तरं [5]बीजेनाकृत्रिमेण कुङ्कुमेन स्वापेक्षया

१ निस्कृत्य-ख. । २ निबद्धो-ख. । ३ अधिकृतैः-ख. । ४ कुमारीकुसुमकेशरैर्-ख. । ५ धूपेना-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशमांशपरिमाणेन [१]उत्पादितसंस्कारः । अत्र मात्रा— पत्राङ्गादीनां पञ्चानां पलम् । माञ्जिकस्य चत्वारि पलानि । तच्चतुर्भागस्तैलस्य । माञ्जिकतैलाभ्यां चतुर्गुणं जलम् । कुमारीकुसुमकेशरस्य दशमांशः कुङ्कुमस्येति ॥चतसृभिः कुलकम्॥२२९--३२॥

एअञ्चिअ परिअम्मं जवगोहुमकलमसिम्बिधण्णाण ॥
एक्कस्स घुसिणकरणे अंकुरनिअरस्स इच्छाइ ॥२३३॥

एतदेवपरिकर्म्म यवगोधूमकलमशिम्बिधान्यानाम् ।
एकस्य कुङ्कुमकरणेऽङ्कुरनिकरस्येच्छया ॥

यवादीनां सम्बन्धिनः सूक्ष्मप्रथमाङ्कुरसमूहस्यैकतमस्य स्वाभिप्रायेण काश्मीरकत्वापादने पूर्वगाथोक्तमेव[२] विधानं कार्यम् । यवादीनामङ्कुरनिकरः पूर्वोक्तेन परिकर्मणा कुङ्कुमं भवतीत्यर्थः ॥२३३॥

बहुसो सच्छम्बिलमत्थुधुअणविहिबिअअगन्धवण्णाइ ॥
सुक्खाइ खइरसेहालिअकढिअजलजणिअराआइ ॥
पुडविहिणा परिणअविल्लमज्झसिद्धाइ घुसिणविद्धाइ ॥
पावन्ति कुसुम्भअकेसराइ णवकुंकुमच्छाअं ॥२३४-२३५॥

वहुशः स्वच्छाम्लमस्तुधावन[३]विधिविगतगन्धवर्णानि ।
शुष्काणि खदिरशेफालिकाक्कथितजलजनितरागाणि ॥
पुटविधिना परिणतविल्वमध्यसिद्धानि कुङ्कुमविद्धानि ।
प्राप्नुवन्ति [४]कुसुम्भककेशराणि नवकुङ्कुमच्छायाम् ॥

कुसुम्भकस्य यावकस्य [५]किञ्जल्कानि प्रत्यग्रकाश्मीरक[६]कान्तीनि भवन्ति । कीदृशानि सन्ति— पुनःपुनर्निर्मलचुक्रदधिमण्डक्षालनकर्मणा निवृत्तनिजामोदच्छायानि । ततः परिवाणानि ततः खादिरशेफालिकाभ्यां गायत्री[७]ताम्रवृन्ताभ्यामुत्पादितलौहित्यानि । ततः पुटपाकविधानेन प्रागुक्तेन पक्वस्य मालूरफलस्य निष्कुषितसारे गर्भे स्विन्नानि । ततोऽकृत्रिमेण दशमांशमात्रपरिमाणेन कुङ्कुमेन कृतवेधानीति ॥युगलकम्॥२३४-३५॥

अहिणवगहिउज्जलदीहकेसरं मत्थुधुअणसंसुद्धं ॥
सिचअणिबद्धं जलवाहविणिहिअं रअणिपरिवसिअं ॥
गुडजलसिद्धं वहुसो दद्दरए सिप्पिधूविअविसुक्खं ॥

---

१ संपादितः-ख. । २ मेवं-ख. । ३ विधिना-ख. । ४ कुसुम्भ-ख. । ५ किंजल्कं-ख. । ६ कान्ति ख. । ७ ताम्रवृत्ताभ्यां-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुंकुमछब्भाअजलेण भाविअं सत्तवाराइ ॥
सुघडन्तवण्णपरिमलकेसरसट्ठाणवीअसम्वलिअं ॥
होइ कुसुम्भंविअ तुलिअकुंकुमं जणिअवहुविहवं ॥२३६-२३८॥

अभिनवगृहीतोज्ज्वलदीर्घकेशरं मस्तुधावनसंशुद्धम् ।
वस्त्रनिबद्धं [1]जलवाहविनिहितं रजनीपर्युषितम् ॥
गुडजलसिद्धं वहुशो दर्दरके [2]शुक्तिधूपितविशुष्कम् ।
कुङ्कुमषड्भागजलेन भावितं सप्त वारान् ॥
सुघटमानवर्णपरिमलकेशरसंस्थानवीजसंवलितम् ।
भवति कुसुम्भमेव तुलितकुङ्कुमं जनितबहुविभवम् ॥

[3]कुसुम्भमेव स्पर्धितकाश्मीरकमत एवोत्पादितभूरिधनसमृद्धि सम्पद्यते । कीदृशं सत्-
प्रथमं तावत् प्रत्यग्राणि गृहीतानि लोहितविततानि किञ्जल्कानि यस्य तादृशं सद्
दधिमण्डप्रक्षालनेनापनीत[4]स्वगन्धवर्णत्वात् संशुद्धं ततः कर्पटान्तर[5]संहितं वहति जले
विनिक्षिप्तं सत् निशां स्थापितं ततो गुडमिश्रेण जलेन स्विन्नं ततः पूर्वोक्तेन क्रमेण
दर्दरके भाण्डविशेषे नखेन दत्तधूपं सत् परिवाणं पश्चादकृत्रिमेण कुङ्कुमेन स्वापेक्षया
[6]षष्ठांशमात्रपरिमाणेनारंजितं यज्जलं तेन पुनः पुनरार्द्रीकरणशोषणविधिना सप्तकृत्वो
दत्तभावनं ततः सुष्ठुसम्पन्नकान्त्यामोदानि किंजल्करूपाणि यस्य तादृशेनाकृत्रिमेण वीज-
भूतेन कुङ्कुमेन दशमांशमात्रपरिमाणेन मिश्रितमिति ॥तिसृभिः कुलकम् ॥२३६-२३८॥

घणसवरमुणालवारिसेलेअअसंजुत्तए ॥
कअसेअं सलिलम्मि सोषिअं सुकुसुम्भअं ॥
लक्खारससेएहि जणिअमणहरवण्णअं ॥
कुंकुममिणमं कुणह लडहविलासिणीजोग्गं ॥२३९॥

घनशवरमृणालवारिशैलेयकसंयुक्ते ।
कृतस्वेदं सलिले शोषितं सत्कुसुम्भम् ॥
लाक्षारससेकै र्जनितमनोहरवर्णम् ।
कुङ्कुममिदं कुरुत लटहविलासिनीयोग्यम् ॥

श्रेष्ठं कुसुम्भमेव सुन्दरलीलावतीसमुचितं काश्मीरकं सम्पादयत । कीदृशं सत्-
पूर्वं मुस्तलोध्रोशीरवालकशिलापुष्पैः संहिते जले स्विन्नं ततः परिवापितं [7]ततोऽ
लक्तकनिस्यन्दस्य सेकैरुत्पादितहृद्यच्छायमिति ॥२३९॥

१ जलवाहिनी-ख. । २ शुक्तिधूपन-ख. । ३ कुसुंभकिंजल्कनेव-ख. । ४ गन्धवर्णवान्-ख. ।
५ सहितं--ख. । ६ सप्तांश--ख. । ७ ततोलक्तकस्य--ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छाआसोसिअमक्कोल्लकेसरं कुसुमसारदरमलिअं ॥
किंसुअरसोल्लोल्लिअं पक्खित्तं वेणुणलअम्मि ॥
कुसपंकवेढिअं विगअधूमवणछाणजलणकअसेअं ॥
सुक्खं गौ रसलिलेण भाविअं कुङ्कुमं होइ ॥२४०-४१॥

छायाशोषितमङ्कोल्लकेशरं कुसुमसारदरमलितम् ।
किंशुकरसाद्रीतं प्रक्षिप्तं वेणुनलके ॥
कुशपङ्कवेष्टितं विगतधूमवनशुष्कगोमयज्वलनकृतस्वेदम् ।
शुष्कं गौ रसलिलेन भावितं कुङ्कुम भवति ॥

[1]इरिकिल्लपुष्पकिञ्जल्कमेव [2]काश्मीरकं सम्पद्यते । कीदृशं सत्—प्रथममनातपे शोषितं ततो माक्षिकेण मनाङ् मृदितं ततः पलाशपुष्परसेन सिक्तं ततो वंशनालाभ्यन्तरे न्यस्तं ततस्तां [3]वंशनालीं कुशैर्दर्भैःसमन्ततो वेष्टयित्वा नलिनी.तल)कर्दमेनचोपरि लेपं दत्त्वा शुष्कारण्यगोशकृन्निर्धूमकाग्नौ[4] स्विन्नं ततः परिवाणं सदकृत्रिमकुङ्कुममिश्रेण जलेन कृतभावनमिति ॥युगलकम्॥२४०-२४१॥

पुनरुत्तमत्थुधुअणविअलिअवण्णामोअं ॥
कढिउज्जलखइरसारसेहालिआरसरत्तं ॥
सिद्धं विल्लाइअम्मि पुडविहिणा सुकुसुम्भं ॥
कुङ्कुमदसभाअसलिलभाविअं घुसिणं ॥२४२॥

पुनरुक्तमस्तुधावनविगलितवर्णामोदम् ।
कथितोज्ज्वलखदिरसारशेफालिकारसरक्तम् ॥
सिद्धं विल्वादिके पुटविधिना सुकुसुम्भम् ।
कुङ्कुमदशभागसलिलभावितं कुङ्कुमम् ॥

शोभनं यावकमेव कुङ्कुमं सम्पद्यते । कीदृशं सत्- पूर्वं पुनः पुनर्दधिमण्डप्रक्षालनेन[5] निवृत्तनिजकान्तिसौगन्ध्यं ततः क्वथितस्य गायत्रीकाष्ठस्य तथा[6]ताम्रवृन्तायाः सम्बन्धिना रसेन रञ्जितं ततो मालूरदधित्थादीनामेकतमस्य गर्भे पूर्वोक्तयुक्त्या पुटपाकेन स्विन्नं तवस्ततो निष्कृष्याकृत्रिमकुङ्कुमेन स्वापेक्षया दशमांशमात्रपरिमाणेन सप्तधाकृतेन सप्त-वारान् जलमिश्रितेन रञ्जितमिति ॥२४२॥

---

१ इतिकिल्ल-ख. । २ नवकाश्मीरकं-ख. । ३ वंशनाडीं-ख. । ४ निर्धूमकराग्नौ-ख. । ५ निर्वृत्ति-ख. । ६ ताम्रवृत्तायाः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महुकुडवं कउहपसूअचुग्णमाणुम्मीसमरुणकरविपक्कं ॥
लहुघुसिणतुहिणमालविद्धं घुसिणासवं कुणह ॥२४३॥

मधुकुडवं [1]ककुभप्रसूनचूर्णमानोन्मिश्रमरुणकरविपक्वम् ।
लघुकुङ्कुमतुहिनमालाविद्धं कुङ्कुमासवं कुरुत ॥

[2]इदमुक्तानां कृत्रिमकुङ्कुमानां संस्कारार्थमासवं साधयत । किं तत्- माक्षिकस्य पलाष्टकम् । कीदृशम्— अर्जुनपुष्पाणां चूर्णस्य मुष्ट्या सहितं, ततः पञ्चमात्रं सूर्यातपे पक्वम्, सूर्यसारथे रश्मिभिः प्रभातातपेन पक्वमित्यन्ये । ततोऽगुरुकुङ्कुमकर्पूरस्पृक्काभिर्दत्तवेधमिति ॥२४३॥

—कुङ्कुमकृतिः ।

तुषसलिलपञ्चपल्लवमज्झविपक्काइ सत्तदिअहाइ ॥
णिंबतरुसारखंडाइ लोहसरिसाणि जाअन्ति ॥२४४॥

तुषसलिलपञ्चपल्लवमध्यविपक्वानि सप्तदिवसानि ।
निम्बतरुसारखण्डानि लोहसदृशानि जायन्ते ॥

पिचुमन्दवृक्षकाष्ठशकलान्यगुरुसमानानि सम्पद्यन्ते । कीदृशानि सन्ति— काञ्जिकस्य पूर्वोक्तैः पञ्चभिः पल्लवैः सहितस्य मध्ये काथयुक्त्या कथतानि । किन्तु सप्ताहोरात्रान् प्रतिदिनं नवनवपञ्चपल्लवयोगेन काञ्जिकं कथनीयमिति ॥२४४॥

लघुसरिसरइअखंडो सिंसवसारो तिरत्तमुक्कढिओ ॥
पल्लवजलेण बहुसो कुठ्ठासवभाविओ सुक्खो ॥२४५॥
पुडविहिणा सल्लइसरसदारुखण्डोअरम्मि परिपक्को ॥
लहुइअकालाउरुधूवपरिमलो होइ डज्झन्तो ॥२४६॥

लघुसदृशरचितखण्डः शिंशपसारस्त्रिरात्रमुत्क्वथितः ।
पल्लवजलेन बहुशः कुष्ठासवभावितः शुष्कः ॥
पुटविधिना शल्लकीसरसदारुखण्डोदरे परिपक्वः ।
लघूकृतकालागुरुधूपपरिमलो भवति दह्यमानः ॥

मण्डलपत्रिकायाः सारः काष्ठं [3]दह्यमानः सन्नधरीकृतकृष्णागुरुधूमामोदः सम्पद्यते । कीदृशः- अगुरुतुल्यानि निर्मितानि शकलानि यस्य तथाविधः सन् पूर्वोक्तपञ्चपल्लवजले काथयुक्त्याऽहोरात्रत्रयं पक्वस्ततः पुनः पुनर्वाप्यचूर्णेनासवेन च केनचिद् दत्तभावनस्ततः

---

१ कुसुम्भप्रसूत-ख. । २ इममुक्तानां-ख. । ३ दाह्यमानः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिवाणस्ततः पुटपाकविधिना कुन्दुरुकीकाष्ठखण्डस्याद्र्रस्याभ्यन्तरे स्विन्न इति युगलकम् ॥२४५-२४६॥

सुरदारुसरलसल्लइगोमअकुट्ठाण खंडिअं एक्कं ॥
णववामलूरणिहिअं पिपीलिअचोइअमणुसहिअं ॥
सत्ताहं सुरहिजलकाढिअं गोट्ठे विणिहिअमअणमिणं ॥
पल्लवजलकंजिअगुरुकाढिअमउरुं विसेसेइ ॥२४७-४८॥

सुरदारुसरलसल्लकीगोमयकुष्ठानां खण्डितमेकम् ।
नववामलूरनिहितं[1] पिपीलिकचोदितमणुसहितम् ॥
सप्ताहं सुरभीजलक्वथितं गोष्ठे विनिहितमयनमिदम् ।
पल्लवजलकाञ्जिकगुरुक्वथितमगुरुं विशेषयति ॥

देवदारुचीडाकुन्दुरुकीनां तथा गोमयाख्यस्य निष्पर्यायस्य वृक्षविशेषस्य काष्ठस्य तथा विषाणस्यैषामेकतमस्य काष्ठं शकलीकृतं सदेवंविधं लोहमतिशेते। [2]ततो विशिष्टतरो गन्धो भवतीत्यर्थः। कीदृशम्— प्रत्यग्रवल्मीकनिखातं ततस्तद्वर्तिभिः पीपीलिकैः खादितं भुक्तं सत्तदुच्छिष्टेनाणुना सूक्ष्मेन चूर्णरूपेण भागेन संयुक्तं ततः सप्ताहोरात्रान् गोमूत्रेण पक्वं ततो गवां निवासस्थाने षड्मासान् भूतले निखातं तत उद्धृत्य काथयुक्त्या पञ्चपल्लवक्वथितेन जलेन सहितं यत् तुषोदकं तन्मध्ये क्षिप्तेनाकृत्रिमेणागुरुणा [3]क्वथित-मिति ॥युगलकम्॥१४७-४८॥

तल्लच्छिण्णविसालसाहसल्लइमूलबन्धअं ॥
कअसुसिरं गुरुसणाहजिण्णसुरासंपुण्णअं ॥
णिअखंडणिरुद्धदारमुवरिपईविअज्जलणअं ॥
जाअइ इमिणा कमेण कालाउरुप्पडिरूवअं ॥२४९॥

[4]तलछिन्नविशालशाखसल्लकीमूलबन्धम् ।
[5]कृतसुषिरमगुरुसनाथजीर्णसुरासंपूर्णम् ॥
निजखण्डनिरुद्धद्वारमुपरि प्रदीपितज्वलनम् ।
जायते[6]ऽनेन क्रमेण कालागुरुप्रतिरूपम् ॥

अधोभागात् [7]कृत्तं विस्तीर्णशिखं यत् कुन्दुरुकीमूलकं तदुत्कृष्टागुरुप्रतिनिधिः सम्पद्यते। कीदृशं सत्– प्रथमं तत्रस्थमेवोत्किरणेन[8] कृतविवरं ततोऽगुरुचूर्णसंयुक्तया पुराणमदिरया

१ पिपीलिकखादितमित्यन्यत्र पाठः। २ तथा-ख.। ३ कथनमिति-ख.। ४ भूतलच्छिन्न-ख.। ५ कृतसुषिरं गुरु-ख.। ६ तेन-ख.। ७ कृतं-ख.। ८ त्करणेन-ख.।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भरितं [1]ततः स्वेनैव केनचिद् भागेन स्थगितविवराग्रभागं ततो भूम्यन्तरस्थमेव भूमिपृष्ठे प्रज्वालितानलमिति ॥२४६॥

—अगुरुकृतिः ।

[2]समपंचखइरकररुहककुहपसूएहि सिंसवं तिउणं ॥
कअचुण्णं गुडमहुसीहुम्मीसिअं तेल्लपत्तम्मि ॥
काऊण सूरकरणिअरताविअं मासमवणितलणिहिअं ॥
होइ तुरुक्कं चलचरणविद्धमइमंसलामोअं ॥२५०-५१॥

समपंच[3]निर्यासकररुहककुभप्रसूनेभ्यः शिंशपां त्रिगुणाम् ।
कृतचूर्णां गुडमधुसीधून्मिश्रितां तैलपात्रे ॥
कृत्वा सूर्यकरनिकरतापितं मासमवनितलनिहितम् ।
भवति तुरुष्कं चलचरणविद्धमतिमांसलामोदम् ॥

एवं कृत्वा सिल्लकं सम्पद्यते । कीदृशम्— उक्तपरिकर्मणि कृते [4]सति सिह्लकस्य चतुर्थेनांशेनानुविद्धमतएवोत्पन्नसान्द्रसौरभम् । किं कृत्वा- मण्डलपत्रिकां[5]काष्ठरूपामेवंविधां कृत्वा । कीदृशीम्[6]— पिष्टाम् । किंभूतां सतीम्— समांशेभ्यः कुन्दुरुसर्जरसश्रीवासबोल-गुग्गुलुभ्यः पञ्चभ्यो निर्यासेभ्यस्तथा नखार्जुनपुष्पाभ्यां तत्समांशाभ्यामेव [7]त्रिगुणाम् । ततः गुडमाक्षिकसीधुभिश्चूर्णरूपामालोडिताम्[8] । ततः पूर्वं यत्र तैलमासीत् तादृशे भाजने पक्षमात्रं रविकिरणक्वथिताम् । ततः पक्षद्वयं क्षित्यभ्यन्तरे निखातामिति ॥ युगलकम्॥२५०-५१॥

[9]सिरिमालकुन्दचन्दणपुरसल्लइकुट्ठरोहिणिणहेहि ॥
समुरेहि समेहि सिवापाआहिअभाअसरिसेहि ॥
दिउणिअसिंसिवचुण्णेहि पिण्डसमसीहुमहुविपक्केहि ॥
होइ तुरुक्कं केसरदमणअचलपाअभाएहि ॥२५२-५३॥

श्रीमालकुन्दचन्दनपुरसल्लकीकुष्ठरोहिणीनखैः ।
[10]समुरैः समैः शिवापादाधिकभागसदृशैः ॥
द्विगुणितशिंशपाचूर्णैः पिण्डसमसीधुमधुविपक्वैः ।
भवति तुरुष्कं केसरदमनकचलपादभागैः ॥

१ ततश्चैरेव-ख. । २ समपंचखडर-ख. । ३ खदर-ख. । ४ सत्यसिल्लकस्य-ख. । ५ पत्रि-काकाष्ठरूपां-ख. । ६ कीदृशम-ख. । ७ त्रिगुणम्-ख. । ८ मालोडितम्-ख. । ६ सिद्धिसाल-ख. । १० सपुरैः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतैः सिह्लकं सम्पद्यते । कैः— श्रीवासकुन्दुरुमलयगुग्गुलुकुन्दुरुकीकाष्ठकुवलय [1]कटुका-करुहैः । कीदृशैः [2]-सुगन्धमुख्या सहितैः सर्वैः समांशैस्तथा हरीतक्या पादाधिकेन सपादेन भागेन संयुक्तैरित्यर्थः । तथा द्विगुणितं मण्डलपत्रिकाचूर्णं येषां तैस्तथाविधैः । यावन्त्येतानि सर्वाणि द्रव्याणि ततो द्विगुणं शिंशपाचूर्णमित्यर्थः । तथा पिण्डेन सर्वद्रव्यसमुदायेन तुल्यपरिमाणे ये सीधुमाक्षिके ताभ्यां पक्वैस्तथा[3] वकुलस्यतापस-सिह्लकयोश्च चतुर्थांशौ येषां तादृशैरिति ॥युगलकम्॥२५२-५३॥

समतुलिअसालसल्लइसिरिवासअदुग्गकुन्दुरुभाएहि ॥
पंचउणसिंसिवसारवउलकुसुमेहि कअं चुण्णं॥ २५४ ॥
कररुहगुडमहुविद्धं णिक्खित्तं सरसवेणुणालीए ॥
पुडविहिसिद्धमवीअं पि होइ सुहपरिमलं तेल्लं॥ २५५॥

समतुलितसालसल्लकीश्रीवासदुर्गकुन्दुरुभागैः ।
पंचगुणशिंशपासारवकुलकुसुमैः [4]कृतं चूर्णम् ॥
कररुहगुडमधुविद्धं निक्षिप्तं सरसवेणुनाल्याम्[5] ।
पुटविधिसिद्धमबीजमपि भवति शुभपरिमलं तैलम् ॥

उत्कृष्टामोदं सिह्लकमेवं सम्पद्यते । कीदृशम्— तुल्यपरिमाणैः सर्जरसकुन्दुरुकीकाष्ठ-मीत्वा(?)स्नावगुग्गुलुकुन्दुरूणां भागैः । कीदृशैः— पञ्चगुणं मण्डलपत्रिकावकाष्ठं केसर-कुसुमानि च येषां तैः सर्वैः [6]सम्पादितं चूर्णं ततो नखगुडमाक्षिककृतवेधं सदार्द्रवंश-नलिकाभ्यन्तरे न्यस्तं ततः पूर्वोक्तेन पुटपाकविधिना स्विन्नं बीजेन सत्यासिह्लकांशेन रहितमपि तद्रूपं भवतीति ॥युगलकम् ॥२५४-५५॥

णरणाहविसाणसालजलजलहरसुरवच्छआ ॥
सहिआ पुरकल्ललेहि समसिंसवासणाहआ ॥
कअचुण्णा सउडसीहुकुसुमरसोल्लिअदेहआ ॥
भणिआ चलजोअम्मि थोअतुरुक्कुम्मीसआ ॥२५६॥

नरनाथविषाणसालजलजलधरसुरवृक्षाः ।
सहिताः पुरकललाभ्यां समशिंशपासनाथाः ॥
कृतचूर्णाः सगुडसीधुकुसुमरसार्द्रीकृतदेहाः ।
भणिताश्चलयोगे स्तोकतुरुष्कोन्मिश्राः ॥

१ कन्दुका--ख. । २ कीदृशम्-ख. । ३ वकुलतामसषिल्लकयोश्चतुर्थांशौ-ख. । ४ कृतचूर्णम्-ख. । ५ नाड्याम्-ख. । ६ सम्पादितचूर्णम्-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एते सिह्लकस्य योजनायां कथिताः । [1]एते युक्ताः सिह्लकं [2]संपद्यन्त इत्यर्थः । के ते- तगरकुष्ठसर्जरसमुस्तबालकदेवदारवः समांशाः । कीदृशाः- गुग्गुलुमांसीभ्यां समांशाभ्यां युक्तास्तथा सर्वेषां तुल्यपरिमाणया मण्डलपत्रिकया [3]समन्विताः सन्तश्चूर्णीकृतास्ततः सगुडेन सीधुना माद्विकेन चालोडितशरीरास्ततः परिमितेन सत्यसिह्लकेन संयोजिता इति ॥२५६॥

जम्बूजलदरमलिअं तिहलासलिलेण भाविअं बहुसो ॥
तेल्लमइजणिअवण्णं वउलासववत्तिआमोअं ॥२५७॥

जम्बूजलदरमलितं त्रिफलासलिलेन भावितं बहुशः ।
तैलमतिजनितवर्णं वकुलासववर्तितामोदम् ॥

सिह्लकमतिशयेनोत्पादितस्वकान्ति तथा वक्ष्यमाणेन वकुलासवेन विशेषितसौगन्ध्यं भवति । कीदृशं सत्— राजजम्बूपल्लवरसेन मनाङ् मृष्टं तथा हरीतकीबिभीतामलकैः काथयुक्तया क्वथितेन तोयेन पुनःपुनरार्द्रीकरणशोषणक्रमेण दत्तभावनमिति ॥२५७॥

सल्लइमालूरज्जुणसिंसवतरुवक्कलाणमेक्केण ॥
कअपरिकम्मेण दलं सामण्णं तेल्लजुत्तीण ॥२५८॥

सल्लकीमालूरार्जुनशिंशपातरुवल्कलानामेकेन ।
कृतपरिकर्मणा दलं सामान्यं तैलयुक्तीनाम् ॥

सिह्लककृतीनां साधारणं दलं सारमिदम् । केन वस्तुना भवति— कुन्दुरुकी[4]विल्व-ककुभमण्डलपत्रिकाख्यानां चतुर्णां ये त्वग्भागास्तेषामेकतमेन । कीदृशेन— सम्पादित-शंधनचूर्णीकरणाद्युत्तरमुत्तरगाथोक्तसिल्हकसामान्यदलभूतसल्लक्यादिवल्कलामलसंस्कारे-णेति ॥२५८॥

ससिमिरिअचुण्णगुण्ठिअकेसरचुण्णेहि महुणिहित्तेहि ॥
होइ वउलासवो जउसारिअदहभंडणिहिएहि ॥२५९ ॥

शशिमरिचचूर्णगुण्ठितकेसरचूर्णैः मधुनिहितैः ।
भवति वकुलासवो जतुसारितदृढभाण्डनिहितैः ॥

अयं वकुलासवो भवति । कैः- कर्पूरतीक्ष्णयो रजसा[5]वघूर्णितैर्वकुलपुष्पचूर्णैर्माद्विकम-ध्यनिक्षिप्तैस्तथार्द्रीकृतलाक्षाविलिप्तेऽभग्नभाजने न्यस्तैः । कृत्रिमसिह्लकानां संस्कारार्थ-मयमासव इति ॥५९॥

—सिह्लककृतिः ।

१ एतैर्युक्ता-ख. । २ संपद्यते-ख. । एतैर्युक्तैः सिह्लकं संपद्यत इति । ३ सम्बन्धिताः-ख. ।
४ विल्वउत्तरु-ख. ५ वचूर्णितैः-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलजलहरकुडिलाउरुरअणीदलचलपिअंगुतअरेहि ॥
सिद्धं णलिआइ जुअं घणखइरजलोल्लिअं तेल्लं ॥
सिअसिचअंचलगलिअं सुन्दरसहआरवेहमत्तेण ॥
होइ सहआरतेल्लं सव्वंविअ मंसलामोअं ॥२६०-६१॥

जलजलधरकुटिलागुरुरजनीदलचलप्रियंगुतगरैः ।
सिद्धं नलिकया युतं घनखदिरजलार्द्रीकृतं तैलम् ॥
सितांशुकाञ्चलगलितं सुन्दरसहकारवेधमात्रेण ।
भवति सहकारतैलं सर्वमेव मांसलामोदम् ॥

इदं साध्यमानं तैलं श्रेष्ठेन सहकारेणाम्ररसेन विद्धमात्रं समस्तमेव सान्द्रसौरभं सहकारतैलं सम्पद्यते । कीदृशम्— मुस्तगायत्रीभ्यां क्वाथयुक्त्या क्वथितेन जलेनार्द्रीकृतं मिश्रितमित्यर्थस्ततो गर्भनिक्षिप्तैरेतैर्द्रव्यैः सिद्धं सम्पन्नम् । कैः— बालकमुस्तमांसीलोध्रशुद्धहरिद्रागन्धपत्रसिह्लकफलिनीतगरैर्विद्रुमलतासंयुक्तैस्तैलापेक्षयाषड्भागमात्रपरिमाणैस्ततः शुक्लवस्त्रान्तरे [1]निक्षिप्तं सत् ततः प्रस्तुतमिति ॥युगलकम्॥२६०-६१॥

फलिणिदलकुन्दकन्धरसिरिमालपिसल्लिविद्दुमलआहि॥
पक्कं कलितरुतेल्लं माअन्दकसाअसंजुत्तं ॥२६२॥
सहआरतेल्लविद्धं पसण्णणवपदुमराअसारिच्छं ॥
[2]गन्धाअट्ठभमरउलं मणहरं होइ सहआरं ॥२६३॥

फलिनीदलकुन्दकन्धर[3]श्रीमालपिसल्लीविद्रुमलताभिः ।
पक्वं कलितरुतैलमाम्रकषायसंयुक्तम् ॥
सहकारतैलविद्धं प्रसन्ननव[4]पद्मरागसदृक्षम् ।
गन्धाकृष्टभ्रमरकुलं मनोहरं भवति सहकारम् ॥

विभीतकफलस्यान्तर्वर्त्तिसारनिष्पीडितं तैलमेवं सहकाररसः सम्पद्यते । कीदृशं सत्-प्रथममाम्रवृक्षत्वचः क्वाथयुक्त्या क्वथितेन जलेन मिश्रीकृतं तत एतैः कल्कद्रव्यैः पूर्वोक्तमात्रया गर्भीकृतैः पक्वम् । कैः— प्रियङ्गुगन्धपत्रकुन्दुरुमुस्तश्रीवासमांसीनलिकाभिः । ततः सहकाररसेनैवाकृत्रिमेण कृतवेधमतएव वर्णसौरभातिशयात् स्वच्छपद्मरागतुल्यकान्ति सौरभाहृतमधुकरकुलं च भवतीति ॥युगलकम्॥२६२-६३॥

---

१ निक्षिप्ता प्रस्तुतमिति–ख. । २ गन्धाकृष्ट–ख. । ३ श्रीसाल–ख. । ४ पद्मरागसदृशम्–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चण्डापिसल्लिणलिआसोआमणिघुसिणवक्कलसणाहं ।
अहिणवराअंवुकसाअसाहिअं णिम्मलं तेल्लं ॥
माअन्दतेल्लपंचंसमेलिअं होइ विद्दुमच्छाअं ।
सहकारतेल्लमिणमो विअद्धचूडामणीदइअं ॥२६४-६५॥

चण्डापिसल्लीनलिकासौदामन्यरुणवल्कलसनाथम् ।
अभिनवराजजम्बूकषायसाधितं निर्मलं तैलम् ॥
सहकारतैलपञ्चांशमेलितं भवति विद्रुमच्छायम् ।
सहकारतैलमिदं विदग्धचूडामणिदयितम् ॥

इदं सहकारतैलं समाख्यते। किं तद् वस्तु- विशुद्धतैलमेव। कीदृशं सत्-प्रत्यग्रजम्ब्वाः सुरभिपत्राणाः क्वाथयुक्त्या कथितेन जलेन सम्पादितं तत एतैर्द्रव्यैः पूर्वोक्तमात्रया गर्भीकृतैः [1]संयुक्तम्। कैः—क्रोधनिकामांसीविद्रुमलतैलाकुङ्कुमत्वचैः। ततोऽकृत्रिमस्याम्ररसस्य पञ्चमेन भागेन मिश्रितमतएव [2]शोभातिशययुक्तत्वात् प्रवालतुल्यकान्ति मूलदेववल्लभमिति ॥युगलकम्॥२६४-६५॥

[3]सल्लइखइररत्तचन्दणमंजिट्ठाणलिणिचुण्णकअगन्धं ॥
खरतरणिकिरणपक्कं तेल्लं सहआरसमगन्धं ॥२६६॥

सल्लकीनिर्यासरक्तचन्दनमंजिष्ठानलिनीचूर्णकृतगर्भम् ।
खरतरणिकिरणपक्वं तैलं सहकारसमगन्धम् ॥

इदं तैलं सहकारतुल्यामोदं भवति। कीदृशम्—कुन्दुरुलोहितचन्दनचित्रवल्लीविद्रुमलतानां चूर्णेन कृतो गर्भो यस्य तत् तथा तीक्ष्णार्ककरैः पत्त्रमात्रं दत्तक्वाथमिति ॥२६६॥

दणुइन्दा[4]सारवारिविद्दुमलआसणाहअं ॥
सोआमिणिकललघुसिणभाउम्मीसिअअं ॥
तेल्लं जम्बुकसाअसाहिअमुज्जलवण्णअं ॥
विद्धं सहआरेण होइ फुडं सहआरअं ॥२६७॥

दनुजेन्द्रा[4]सारवारिविद्रुमलतासनाथम् ।
[5]सौदामिनीकललकुङ्कुमभागोन्मिश्रितम् ॥
तैलं जम्बूकषायसाधितमुज्ज्वलवर्णम् ।
विद्धं सहकारेण भवति स्फुटं सहकारम् ॥

---

१ संयुक्तं;-क. । २ सौरभा(ति)शयतुल्यात्-ख. । ३ सल्लइसरड-ख. । ४ सारि-ख. । ५ सौदामनी-ख.।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं तैलं प्रकटमेव सहकारत्वमापद्यते । कीदृशं सत्— प्रथमं क्वाथयुक्त्या क्वथितेन राजजम्बूजलेन[1] संयोजितं ततो गर्भीकृताभिमुखरात्वचबालकर्नालकाभिः संयुक्तं तथैलामांसीविषाणारुणानां समभागैः पूर्वोक्तमात्रया सहितं सत् पक्वमत एषोऽज्ज्वलच्छायं ततः सत्यसहकाररसेन कृतवेधमिति ॥२६७॥

—सहकारकृतिः ॥

तेल्लालोडिअपरिणअमालूरगिरेहि गहिअसुक्खाण ॥
वीआण होइ तेल्लं विद्धं कप्पूरतेल्लं व ॥२६८॥

तैलालोडितपरिणतमालूरगिराद् गृहीतशुष्काणाम् ।
बीजानां भवति तैलं विद्धं कर्पूरतैलमिव ॥

इदं तैलं कर्पूरतैलमिव सम्पद्यते । तदेव कर्पूरपानीयतुल्यं भवतीत्यर्थः । केषां सम्बन्धि तैलम्— बीजानाम् । कीदृशाम्— तैलेनार्द्रीकृतात् सुविपक्वबिल्वमज्ज्ञो गृहीतानां तदनु शुष्काणां ततः पीडितानाम् । कीदृशम्— अकृत्रिमेण कर्पूरपानीयेन कृतवेधं सत् तैलमेवं भवतीति ॥२६८॥

कोमलसिअमिरिअकन्दतणुकन्दलसणाहअं ॥
सहसुकसणमट्टिआवारहगुणपरिमाणअं ॥
कढिअं मउअणलेण ववगअफेणाबन्धअं ॥
धवलंसुअगलिअविमलमहिणवपत्तम्मि णिहिअं ॥
कयलेलासारकोलफलचुण्णंससणाहअं ॥
सत्ताहपरिट्ठिअं हु गालिअमणु सुपसण्णअं ॥
तेल्लं कप्पूरतेल्लपंचमभाउम्मीसिअअं ॥
ससितेल्लमिणं भणन्ति ससिमत्तकअवेहं ॥२६९-७०॥

कोमलसितमरिचकन्द[2]तनुकन्दलसनाथम् ।
सहसुकृष्णमृत्तिकाद्वादशगुणपरिमाणम् ॥
क्वथितं मृदुनलेन व्यपगतफेनाबन्धम् ।
धवलांशुकगलितविमल[3]मभिनवपात्रेनिहितम् ॥
कयलैलासारकोलफल[4]चूर्णांशसनाथम् ।
सप्ताहपरिस्थितं खलु गालितमनुसुप्रसन्नम् ॥
तैलं कर्पूरतैलपञ्चमभागोन्मिश्रितम् ।
शशितैलमिदं भणन्ति शशिमात्रकृतवेधम् ॥

१. दलेन-ख. । २ तद-ख. । ३ लमभिन्नपात्र-ख. । ४ चूर्णसनाथम् ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं तैलं कर्पूरतैलं कर्पूरपानीयं कथयन्ति । कीदृशम्–प्रत्यग्रशोभाञ्जनमूलसूक्ष्माङ्कुरसंयुक्तं तथा सुकृष्णया मृत्तिकया सह द्वादशगुणं परिमाणं यस्य तत् तथा । कन्दमृत्तिकयोर्यावद्भागस्तावन्तो द्वादशभागास्तैलस्येत्यर्थः । एवंविधं सदनुत्कटाग्निना तैलचतुर्गुणेन जलेन क्वथितं ततः फेनोद्गमे सति चुल्लीतोऽ[1]वतारितं ततः [2]प्रशान्तफेनावर्तं सत् सितवस्त्रपूतत्वान्निर्मलं द्रव्यान्तरसम्पर्करहिते भाजने निक्षिप्तं ततः कर्चूरत्रुटित्वचककोलकजातीफलचूर्णानां समैर्भागैर्युक्तं ततः सप्ताहोरात्रान् स्थितं सत् पुनर्वस्त्रपूतत्वादतिनिर्मलं ततः सत्यकर्पूरपानीयस्य पञ्चमेनांशेन योजितं ततः कर्पूरलेशेनानुविद्धमिति ॥ युगलकम्॥२६९-७०॥

लाइअपक्खालिअसोहिआण पत्थं तिलाण कअचुण्णं ॥
कच्चूरवक्कलेलाकक्कोलआण सरिछभागेहि ॥२७१॥
दलदिउणभाअमीसीकएहि संजोइऊण कुडवद्धं ॥
गहिअं पीडणविहिणा तेल्लं ससितेल्लपडिरूवं ॥२७२॥

लुञ्चितप्रक्षालितशोधितानां प्रस्थं तिलानां कृतचूर्णम् ।
कर्चूरवल्कलैलाकक्कोलकानां सदृशभागैः ॥
दलद्विगुणभागमिश्रीकृतैः संयोज्य कुडवार्धम् ।
गृहीतं पीडनविधिना तैलं शशितैलप्रतिरूपम् ॥

इदं तैलं कर्पूरतैलस्य प्रतिनिधिः संपद्यते । कीदृशम्— निष्पीडनकर्मणा गृहीतम् । कथम्— तिलानां प्रस्थः षोडशपलानि । कीदृशानाम्— प्रथमं निस्तुषीकृतानां ततो धौतानां ततः परिवापितानां तादृशानाम् । कीदृशः प्रस्थः— चूर्णीकृतः । तथाविधं तिलप्रस्थम् । कयलत्वचत्रुटिकोलफलानां समैर्भागैरेकत्र कुडवार्धं पलद्वयं मिश्रीकृत्य । कीदृशैः— गन्धपत्रस्य द्वाभ्यां भागाभ्यां पलेन सहितैरिति ॥युगलकम्॥२७१-२७२॥

—कर्पूरपानीयकृतिः ।

कढिआइं पंचपल्लवसलिलेन होन्ति कुलिसकुसुमाइं ॥
वोलजलचउज्जाअकमलिआइं लवङ्गसरिसाइं ॥२७३॥

क्वथितानि पंचपल्लवसलिलेन भवन्ति कुलिशकुसुमानि ।
वोलजलचतुर्जातकमलितानि लवङ्गसदृशानि ॥

[3]सुधावृक्षपुष्पाणि देवकुसुमतुल्यानि जायन्ते । तत्समानवर्णसौरभाणि भवन्तीत्यर्थः । कीदृशानि— पूर्वोक्तानां पञ्चपल्लवानां क्वाथयुक्त्या गृहीतेन क्वाथपानीयेन क्वथितानि । ततो रसह्रीवेरत्वक्सूक्ष्मैलागन्धपत्रनागकेशरैः समांशैर्मर्दितानीति ॥२७३॥

—लवङ्गकृतिः ।

१ ऽवतारयेत्त-ख. । २ प्रसन्न-ख. । ३ सुधाक्षीरवृक्ष-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णिच्छल्लिअजवदालिआइ[1] कआवसेआइ [2]दद्दरअम्मि ॥
बहुसो एलाजलभाविआइ एलादलं होइ ॥२७४॥

निस्तुषीकृतयवदालाचूर्णेन कृतावस्वेदितया दर्दरके[क्ष] ।
बहुश एलाजलभावितया एलादलं भवति ॥

एतया एलादलं त्रुटिप्रतिनिधिः सम्पद्यते । कया — निस्तुषीकृतानां यवानां चूर्णसम्पदा । कीदृश्या— दर्दरके पूर्वोक्ते स्वेदनभाण्डे[3] दत्तास्वेदया ततस्त्रुटिचूर्णमिश्रेण तोयेन बहून् वारान् कृतभावनयेति ॥

—एलाकृतिः ।

कुट्ठजलकाढिआइ सोसिआइ पुणरुत्तभाविआइ ॥
कुट्ठं विअ होन्ति फुडं हअगन्धाकन्दखंडाइ ॥२७५॥

[4]कुष्ठजलक्वथितशोषितानि पुनरुक्तभावितानि ।
कुष्ठमेव भवन्ति स्फुटं हयगन्धाकन्दखण्डानि ॥

अश्वगन्धामूलशकलानि वाप्यमेव साक्षात् सम्पद्यन्ते । कीदृशानि सन्ति— वाप्येन पयसा च क्वाथयुक्त्या कषायीकृतेन दत्तक्वाथानि ततस्तस्मान्निष्कृष्य परिशोषितान्येव पौनःपुन्येन दत्तभावनानीति ॥

—कुष्ठकृतिः

[5]सहआररसो सेन्धवटंगणजवक्खारकअअफललित्ते ॥
पत्तम्मि कओ थअइ अच्छोविअ दीहरं कालं ॥२७६॥

[6]सहकाररसः सैन्धवटङ्कणयवक्षारकतकफललिप्ते ।
पात्रे कृतस्तिष्ठत्यच्छ एव दीर्घकालम् ॥

सहकारतैलं सैन्धवलवणसुवर्णपाचिकायावशूककांसीफलानां पिष्टेन चूर्णेन कृतलेपे निर्मले भाजने स्थापितं सद् बहुकालं निर्मलमेव भवतीति ॥२७६॥

[7]धवलसअपत्तकेसरसिन्धुब्भवकुसुमसारसंजुत्तो ॥
ण कदाचि होइ कढिणो दुग्गइभीरुव्व सहआरो ॥२७७॥

धवलशतपत्रकेसरसिन्धूद्भवकुसुमसारसंयुक्तः ।
न कदाचिद् भवति कठिनो दुर्गतिभीरुरिव सहकारः ॥

---

१ जवदालिचुण्णेण-ख. । २ दद्दरए-ख. । ३ इतः परं 'दर्दरेषु' इत्यधिक पाठः ख पुस्तके । ४ कुट्ठजले-ख. । ५ सहआररस-ख. । ६ सहकाररस-ख. । ७ धवलसअवत्त-ख. । क्ष दद्दरकेण-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहकाररस एवंविधः सन् नित्यमेव रसरूपत्वान्मृदुरेव भवति न जातु घनतां याति। यथा दौर्गत्यत्रस्तः कश्चिदाजीवनं मृदुरेव भवति । कीदृशः सन्—श्वेताब्जकिञ्जल्कसैन्धवलवणमाक्षिकैः सहित इति ॥२७७॥

दढदड्ढसंखणाहीचुण्णो चुण्णो वं दन्तिमूलाण ॥
सुअणहिअअं व विमलं णिक्खित्तो कुणइ सहआरं ॥२७८॥

दृढदग्धशङ्खनाभीचूर्णश्चूर्णो वा दन्तिमूलानाम् ।
सुजनहृदयमिव विमलं निक्षिप्तः करोति सहकारम्॥

अयं चूर्णः सहकाररसं निर्मलं सज्जनमानसमिव सदैव सम्पादयति। कस्य–तन्मध्ये न्यस्तः शंखस्य चूर्णः। पुटपाकविधिना सुष्ठु दग्धायाः कम्बोरब्जविशेषस्य नाभेरग्रवर्तिनो नाभ्याकारस्य भागस्य । अथवा निकुम्भशिफानां चूर्ण एवं [1]करोतीति ॥

—सहकारस्थैर्ययुक्तिः

मुणिकुसुमजालिणीफललट्ठिमहुमुणालटंकचुण्णेण ॥
कुसुमाइ द्रवन्ति मिअंकभाअणम्मि विणिरुद्धाइं॥२७९॥

मुनिकुसुमजालिनीफलयष्टिमधुमृणालटंकचूर्णेन ।
कुसुमानि द्रवन्ति मृगाङ्कभाजने[2] विनिरुद्धानि ॥

सर्वपुष्पाण्येवंविधानि सन्ति रसरूपतामारचयन्ते । कीदृशानि- अगस्त्यवृक्षपुष्पाणां तथा देवदालीफलस्य तथा मधुयष्ट्युशीरटङ्कणानां चूर्णेनावगुण्ठितानि कर्पूरविरचितपात्रे स्थापितान्यर्ककरतापितानि चेति ॥२७९॥

—सर्वपुष्पद्रावणयुक्तिः ।

[3]समहुपरसुछिण्णअमूलगुंढिअं दवइ मल्लिआकुसुमं ॥
धण्णोअरविणिहित्तो चम्पअतरुकुसुमणिवहोव्व ॥२८०॥

[4]समधुपरशुच्छिन्नकमूलगुण्ठितं द्रवति मल्लिकाकुसुमम् ।
धान्योदरविनिहितचंम्पकतरुकुसुमनिबह इव ॥

मदयन्तीपुष्पमेवंविधं सद् रसीभवति । कीदृशम्— माक्षिकेनार्द्रीकृतं यत् कुठारच्छिन्नमूलस्य चूर्णं तेन लिप्तम् । कथं द्रवति— यथा चाम्पेयद्रुमस्य पुष्पसमूहो भाण्डस्थितो व्रीहिराशिमध्ये स्थापितः सन् द्रवति तथैव द्रवतीत्युपमानभङ्ग्या द्वितीयः प्रयोग उक्त इति ॥२८०॥

—मल्लिकाचम्पकद्रावणयुक्तिः ।

१ भवतीति–ख. । २ भाजनेन–ख. । ३ महु–ख. । ४ मधुपरशुच्छिन्नक–ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दढदड्ढमसिणचुण्णिअसंखद्दासरसविलित्तमत्ताइं ।।
केअइपत्ताइ रसं मुअन्ति घम्मे णिहित्ताइ ।।२८१।।

दृढदग्धमसृणचूर्णित[1]शंखाद्र[2]स्वरसविलिप्तमात्राणि ।
केतकीपत्राणि रसं मुञ्चन्ति घर्मे निहितानि ।।

केतकीपुष्पाणां पत्राण्येवंविधानि सन्ति जलस्यन्दीनि भवन्ति द्रवन्तीत्यर्थः । कीदृशानि- अतिशयेन प्लुष्टस्य ततः सूक्ष्मपिष्टस्य कम्बोश्चूर्णेनार्[2]द्र करसेन चावगुण्ठितान्येव । कथं द्रवन्ति— तीक्ष्णातपे स्थापितानीति ।

—केतकीपुष्पद्रावणयुक्तिः ।

इअ एसोवि समत्तो णाणाविहगन्धसारवग्घड्ढो।।
हरमेहलाए पूरिअपंचमवाणो परिच्छेओ ।।२८२।।

इत्येषोपि समाप्तो नानाविधगन्धसारवर्गाढ्यः ।
हरमेखलायाः पूरितपचमबाणः परिच्छेदः ।।

इति हरमेखलायाः पञ्चमः
परिच्छेदः

१ शखस्य स्वादस-खः । २ नार्द्रीकृतानि पानीयं द्रवन्ति-खः । ३ ततस्तीक्ष्णातपे-ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu